श्रीः

अग्निरहस्यब्राह्मणम्

माध्यन्दिन—शतपथब्राह्मणे—दशमं काण्डम् ॥

१०-५-२.

यदेतन्मण्डलं तपति, तन्महदुक्थम्, ता ऋचः, स ऋचाँल्लोकः।

श्रीः

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः।

अग्निरहस्यपरिष्कारः

श्रिया सह वृषाचलाञ्चलवनीषु शृङ्गारिणे
दयादिगुणसद्मने दनुजलोकसंहारिणे।
क्रियामयमनोमयक्रतुसमर्च्यभूम्ने च ते
मयाऽद्य भगवन् अयं शुभकरोऽस्तु बद्धोऽञ्जलिः॥

यदेतन्मण्डलं तपतीत्यादिकमिदं ब्राह्मणं यद्यपि भाष्यकृता न व्याख्यातम्—अथापि उत्तरब्राह्मणविषयविचारात्मके पूर्वविकल्पाधिकरणे, "परेण च शब्दस्य ताद्विध्यं—" इति सूत्रे परशब्देन तदुपरितनब्राह्मणस्येव चकारेण तत्पूर्वभूतस्य एतद्ब्राह्मणस्यापि उत्तरब्राह्मणस्य क्रतुशेषत्वरहितप्रधानविद्याविशेषप्रतिपादकत्वे दृष्टान्ततयोपात्तत्वात्, तत्पूर्वसूत्रे, "न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः" इत्यत्र मृत्युवदिति एतद्ब्राह्मणविषयस्य दृष्टान्तीकरणात्, पूर्वविकल्पाधिकरणभूतानन्तराधिकरणशारीरभावाधिकरणादिषु, एतद्ब्राह्मणगतस्य, 'तं यथा यथोपासते, तदेव भवति' इति तत्क्रतुन्यायवाक्यस्य असकृदुदाहरणाच्च एतद् ब्राह्मणमपि वैशद्याय द्रष्टव्यं भवतीति सह प्रकाश्यते।

अथ यदेतदर्चिर्दीप्यते, तन्महाव्रतम्, तानि सामानि, स साम्नां लोकः। अथ य एष एतस्मिन् मण्डले पुरुषः, सोऽग्निः, तानि यजूंषि, स यजुषां लोकः ॥

सैषा त्रय्येव विद्या तपति। तद्धैतदप्यविद्वांस आहुः—त्रयी वा एषा विद्या तपतीति। वाग्घैव तत् पश्यन्ती वदति ॥ २ ॥

स एष एव मृत्युः, य एष एतस्मिन् मण्डले पुरुषः। अथैतदमृतम्, यदेतदर्चिर्दीप्यते। तस्मात् मृत्युर्न म्रियतेऽमृते ह्यन्तः। तस्मादु न दृश्यतेऽमृते ह्यन्तः ॥ ३ ॥

तदेष श्लोको भवति, अन्तरं मृत्योरमृतमिति। अवरं ह्येतन्मृत्योरमृतम्। मृत्यावमृतमाहितमिति। एतस्मिन् हि पुरुष एतन्मण्डलं प्रतिष्ठितं तपति। मृत्युर्विवस्वन्तं वस्त इति। असौ वा आदित्यो विवस्वान्। एष ह्यहोरात्रे विवस्ते। तमेष वस्ते। सर्वतो ह्यनेन परिवृतः। मृत्योरात्मा विवस्वतीति। एतस्मिन् हि मण्डल एतस्य पुरुषस्यात्मा। एतदेष श्लोको भवति ॥ ४ ॥

तयोर्वा एतयोः उभयोरेतस्य चार्चिष एतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा। तस्मान्महदुक्थं परस्मै न शंसेत्, नेदेतां प्रतिष्ठां छिनदा इति। एतां ह स प्रतिष्ठां छिनत्ति, यो महदुक्थं परस्मै शंसति। तस्मादुक्थशंसं भूयिष्ठं परिचक्षते। प्रतिष्ठां छिन्नो हि भवति। इत्यधिदैवतम् ॥ ५ ॥

अथाधियज्ञम्। यदेतन्मण्डलं तपति, अयं स रुक्मः। अथ यदेतदर्चिर्दीप्यते, इदं तत् पुष्करपर्णम्। आपो ह्येताः आपः पुष्करपर्णम्। अथ य एष एतस्मिन् मण्डले पुरुषः, अयमेव स योऽयं हिरण्मयः पुरुषः। तदेतदेवैतत्त्रय मरुत्स्वेवोपधत्ते। तदप्यस्यैतामु तस्यामूर्ध्वमुत्तामति। तदेतदप्येति, य एष तपति। तस्मादग्नि नाद्रियेत परिहन्तुम्। अमुत्र ह्येव तदा भवतीत्युपाधियज्ञम् ॥ ६ ॥

अस्मिन् अग्निरहस्यब्राह्मणे मण्डलपुरुषे आदौ अग्नित्रभावानां ततो मृत्युत्वभावनाञ्च विधाय, मण्डलपुरुषस्याधिदैवतं स्थितस्य

अथाध्यात्मम् । यदेतन्मण्डल तपति यश्चैष रुक्म, इद तच्छुक्ल मक्षन् । अथ यदेतदर्चिर्दीप्यते यश्चैतत् पुष्करपर्णम्, इद तत् कृष्ण मक्षन् । अथ य एष एतस्मिन् मण्डले पुरुषो यश्चैष हिरण्मय पुरुष, अयमेव स योऽयं दक्षिणेऽक्षन् पुरुष ॥ ७ ॥

स एष एव लोकम्पृणा । तामेव सर्वोऽग्निरभिसम्पद्यते । तस्यै तन्मिथुन योऽय सव्येऽक्षन् पुरुष । अर्द्धमु हैतदात्मनो यन्मिथुनम् । यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्न कृत्स्नतायै । तद्यत् ते द्वे भवतो द्वन्द्वं हि मिथुन प्रजननम् । तस्मात् द्वे-द्वे लोकम्पृणे उपधीयेते । तस्मादु द्वाभ्या द्वाभ्या चिति प्रणयन्ति ॥ ८ ॥

स एष एवेन्द्र, योऽय दक्षिणेऽक्षन् पुरुष । अथेयमिन्द्राणी । ताभ्या देवा एता विधृतिमकुर्वन् नासिकाम् । तस्माज्जायाया अन्ते नाश्नीयात्, वीर्यवान् हास्माज्जायत । वीर्यवन्तमु ह सा जनयति, यस्या अन्ते नाश्नाति ॥ ९ ॥

तदेतद्देवर्त राजन्यबन्धवो मनुष्याणामनुतमा गोपायन्ति । तस्मादु तेषु वीर्यवान् जायतेमृतचाका वयसों साक्षिमद्येन जनयति ॥

तौ हृदयस्याकाश प्रत्यनेत्य मिथुनीभवत । तौ यदा मिथुन स्यान्त गच्छतोऽथ हैतत्पुरुष स्वपिति । तद्यथा हैवेद मानुषस्य मिथुनस्यान्त गत्वा सविद इव भवति, एवं हैवैतसविद इव भवति । दैवं ह्येतन् मिथुनम् । परमो ह्येष आनन्द ॥ ११ ॥

तस्मादेवंवित् स्वप्यात् । लोक्यं हैते एव तद्यत मिथुनेन प्रियेण धाम्ना समर्द्धयति । तस्मादु ह स्वपन्त धुरेव न बोधयेत्, नैदेते देवते मिथुनीभवन्त्यौ हिनसानीति । तस्मादु हैतत्सुषुपुष श्लेष्मणमिव मुख भवति । एत एव तद्देवते रेत सिञ्चत । तस्मात् इद सर्वं सम्भवति यदिद किञ्च ॥ १२ ॥

अधिदैवताद्धिरण्मयपुरुषैक्यम्, अध्यात्म दक्षिणाक्षिगतपुरुषे तदु-भयपुरुषैक्यञ्च प्रदर्श्य, अध्या मपुरुषे लोकम्पृणात्व दक्षिणाक्षिपुरुषे

स एष एव मृत्यु, य एष एतस्मिन् मण्डले पुरुषो यश्चाय दक्षिणेऽक्षन् पुरुष । तस्य हैतस्य हृदये पादावतिहितौ । तौ हैतदाच्छिद्योत्क्रामति । स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते । तस्मादु हैतत् प्रेतमाहुराच्छेद्यस्येति ॥ १३ ॥

एष उ एव प्राण । एष हीमा सर्वा प्रजा प्रणयति । तस्यैते प्राणा स्वा । स यदा स्वपिति, अथैनमेते प्राणा स्वा अपियन्ति । तस्मात् स्वाप्यय । स्वाप्ययो ह वै । तं स्वप्न इत्याचक्षते परोक्षेण परोक्षम् । परोक्षकामा हि देवा ॥ १४ ॥

स एतै सुप्त न कस्यचन वेद । न मनसा सङ्कल्पयति । न वाचाऽन्नस्य रस विजानाति । न प्राणेन गन्ध विजानाति । न चक्षुषा पश्यति । न श्रोत्रेण शृणोति । एतँ ह्येते तदापीता भवन्ति । स एष एक सन् प्रजासु बहुधा व्याविष्ट । तस्मादेका सती लोकम्पृणा सर्वमग्निमनु विभवति । अथ यदेक एव, तस्मादेका ॥ १५ ॥

तदाहु —एको मृत्युर्बहव इति । एकश्च बहवश्चेति ह ब्रूयात् । यदु हासावमुत्र, तेनैक । अथ यदिह प्रजासु बहुधा व्याविष्ट, तेनो बहव ॥

तदाहु —अन्तिके मृत्युर्दूरा इति । अन्तिके च दूरे चेति ह ब्रूयात् । यदहायमिहाध्यात्मम्, तेनान्तिके । अथ यदसावमुत्र, तेनो दूरे ॥१७

तदेष श्लोको भवति । अन्ने भात्यपश्रितो रसानां सक्षरेऽमृत इति । यदेतन्मण्डल तपति, तदन्नम् । अथ य एष एतस्मिन् मण्डले पुरुष सोऽत्ता । स एतस्मिन्नन्नेऽपश्रितो भातीत्यधिदैवतम् ॥ १८ ॥

अथाध्यात्मम् । इदमेव शरीरमन्नम् । अथ योऽयं दक्षिणेऽक्षन् पुरुष, सोऽत्ता । स एतस्मिन्नन्ने अपश्रितो भाति ॥ १९ ॥

तमेतमग्निरित्यध्वर्यव उपासते, यजुरिति । एष हीदँ सर्वं

इन्द्रत्व सव्याक्षिपुरुषे इन्द्राणीत्वञ्च भावयित्वा, मण्डलदक्षिणाक्षिस्थपुरुषयोर्मृत्यु व प्राण चञ्चारोप्य तत इदमुच्यते—

आदित्यमण्डलमिद शरीरञ्चान्नम् । आदित्यपुरुषो दक्षिणाक्षि

युनक्ति। सामेति छन्दोगा । एतस्मिन् हीदं सर्वं समानम्। उक्थमिति बह्वृचा । एष हीदं सर्वमुत्थापयति । यातुरिति यातुविद । एतेन हीदं सर्व यतम्। विषमिति सर्पा । सर्प इति सर्पविद । ऊर्गिति देवा । रयिरिति मनुष्या । मायेत्यसुरा । स्वधेति पितर । देवजन इति देवजनविद । रूपमिति गन्धर्वा । गन्ध इत्यप्सरस ।

त यथा यथोपासते, तदेव भवति । तद्धैनान् भूत्वाऽवति । तस्मादेतमेवंवित् सर्वैरेवैतैरुपासीत । सर्वं हैतद्भवति सर्वं हैनमेतद् भूत्वाऽवति ॥ २० ॥

स एष त्रीष्टकोऽग्नि । ऋगेका, यजुरेका, सामैका । तद्या काश्चाक्चर्चोपदधाति रुक्म एव तस्या आयतनम्। अथ या यजुषा पुरुष एव तस्या आयतनम् । अथ यां साम्ना पुष्करपर्णमेव तस्या आयतनम् । एष त्रीष्टक ॥ २१ ॥

ते वा एते उभे एव च रुक्म एतच्च पुष्करपर्णमेत पुरुषमपीत । उभे हि ऋक्सामे यजुरपीत । एष वेकेष्टक ॥ २२ ॥

स एष एव मृत्यु , य एष एतस्मिन् मण्डले पुरुषो यश्चाय दक्षिणेऽक्षन् पुरुष । स एष एवंविद आत्मा भवति । स यदैवंवि

पुरुषश्चात्मा। स परमात्मा। त यथायथोपासते, तदेव भवति। उपासकेन पुरुषेण यादृशयस्त्वाकारावच्छिन्नतया स्वयमुपासितो भवति, तादृशवस्त्वाकारावच्छिन्न एव भवन् स यथायथ तमुपासकमिह परत्र च रक्षति। तत्त्वतुनयविचार श्रमच्छान्दोग्यपरिशिष्ट द्रष्टव्य। शेष परस्तात्। अथ पुरुष त्रीष्टकाग्निभिर्व्य। ऋग्यजुस्सामोपधेयेष्टकत्वात् अग्नेस्त्रीष्टकता। एकेष्टकश्च भाष्य। ऋक्सामयो र्यजुष्यप्ययात् यजुर्मात्रपरिशेषादकेष्टकत्वम्। एवम्भूतोऽय मण्डले दक्षिणे अक्षिण च स्थित मृत्युर्वेन भाष्य। [सर्वसहर्त्वरूप-सामान्यधर्ममादाय मृत्युत्वभावनेति न सामान्यात्— इति सूत्र-भाष्ये स्थितम्। उत्कृष्टे निकृष्टदृष्टेरयोगात् मृत्युभादस्य गायत्रीसा-

दस्माँल्लोकात् प्रेति, अथैतमेवात्मानमभिसम्भवति । सोऽमृतो भवति । मृत्युर्ह्यस्यात्मा भवति ॥ २३ ॥

इति अग्निरहस्ये पञ्चमाध्याये द्वितीय ब्राह्मणम् ॥

१०-५-३

नैव वा इदमग्रेऽसदासीन्नैव सदासीत् ।

श्रीमते रामानुजाय नमः

[येनोपनिषदा भाष्य रामानुजमतानुगम् ।
रम्य कृत प्रपद्ये त रङ्गरामानुजं मुनिम् ॥]

श्रीरङ्गरामानुजमुनिवरविरचिता अग्निरहस्यप्रकाशिका

अतसीगुच्छसच्छायमञ्चितोरस्स्थल श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यास लक्ष्मणयोगीन्द्र प्रणम्यान्यान् गुरूनपि ।
क्रियतेऽग्निरहस्यस्य विवृतिर्विदुषा मुदे ॥

नैव वा इदमग्रे सदासीत नैवासदासीत् = इद जगत् सर्गाद्यसमये सर्वात्मना अभिव्यक्तनामरूपमपि नासीत् । सर्वात्मना स्वरूपेणाप्यसन्नासीत् । विमृष्टानुन्मीलितचित्रवदासीदित्यर्थ ॥

दस्यवत् विवक्षितमित्यभिप्राय. स्यात् ।] एव भावितोऽयमात्मा स्वान्तरात्मत्वरूपेण यथावस्थिताकारेणोपास्यते चेत्, उपासकः प्रेत्यामृतो भवति । तस्य वस्तुन एतदन्तरात्मत्वादिति ।

इति वात्स्यवचक्रवर्तिवीरराघवाचार्यकृतिषु
उपनिषद्भाष्यपरिष्कारे अग्निरहस्यभागगत-
पूर्वब्राह्मणपरिष्कारः ।

आसीदिव वा इदमग्रे नेवासीत् । तद्ध तन्मन एवास ॥ १ ॥
तस्मादेतदृषिणाभ्यनूक्तम् । नासदासीन्नो सदासीत्तदानीमिति
नेव हि सन्मनो नेवासत् ॥ २ ॥

आसीदिव वा इदमग्रे नेवासीत् । स्वरूपेण सत्त्वात् सदिव, नामरूपव्यक्त्यभावात् असदिवेत्यर्थः । **तद्ध तन्मन आस ।** तत् तदा तन्मनः प्रादुर्बभूव । तस्मिन् काले प्रथमतो मनः सृष्टमित्यर्थः ॥ १

तस्मादेतदृषिणाभ्यनूक्तम् । यत एव सर्गाद्यसमयस्य तादृग्रूपत्वम्, अत एव सर्गाद्यसमयस्वरूपं वेदेनाप्यनूक्तम्, **नासदासीदिति ।** उक्तोऽर्थः । **नेव हि सन्मनो नेवासत् ।** तस्मिन् समये उत्पन्नमपि मनः किञ्चिदभिव्यक्तनामरूपत्वादसदपि न भवति, अत्यन्ताभिव्यक्तनामरूपत्वाभावात् सदपि न भवतीत्यर्थः । २ ॥

(मनश्चिदाद्यग्निब्राह्मणभाष्यपरिष्कारः)

यथा ईशावास्यानुवाकः संहितान्तर्गतोऽपि शारीरकोपयुक्तः सर्वैरादृियते, तथा ब्राह्मणान्तर्गतोऽप्यग्निरहस्यभागोऽयमादरणीयः, शारीरके तृतीयतृतीये मनश्चिदाद्यग्निसाध्यस्य मनोमयस्य क्रतोरत्र विहितस्य मीमांसनात्, उपनिषदन्तरदर्शितवैश्वानरादिविद्याविधानदर्शनाच्चेति विभाव्य सूत्रभाष्याद्यर्थविदाधर्मार्थसंपिपादयिषया उपनिषद्न्तराणामिव अग्निरहस्यभागस्य व्यर्थं प्रकाशयितुमाचार्यो भाष्यमारिप्सुराण सर्वस्वग्रन्थानुगतमङ्गलश्लोकगिरापि निबध्नातीति ।

तद्ध तन्मन एवासेति । मनश्चिदादयोऽग्नयो मनोमया इह वक्ष्यन्ते विद्यामयक्रतूपयोगितया । तत्र मनस एवोपयोगात् सृष्ट्यारम्भे मन एवेह कथितम् । न तावता तत्पूर्वसृष्टमहदादीनां कारणानां व्यावृत्तिः । अपक्षितमात्रेणोपक्रमः श्रुतिर्दर्शी ।

तदिदं मनः सृष्टमाविरबुभूषत् निरुक्ततरं मूर्ततरम्। तदात्मान-मन्वैच्छत्। तत् तपोऽतप्यत। तत् प्रामूर्च्छत्।

तत् षट्त्रिँशतँ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान् मनोमयान् मनश्चितः।

तदिदं ... मूर्ततरम्। एवं मनः सृष्टं ईषदभिव्यक्तनामरूपतया निरुक्तमपि मूर्तमपि निरुक्ततरतया [मूर्ततरतया च?] आविर्भवितुमैच्छत्। अत्यन्तनामरूपव्यापाराभिव्यक्तिमैच्छदित्यर्थः। तदात्मानं ... तपोऽतप्यत। [तत् मनश्शरीरकपरमात्मा ?] आत्मानं चिन्तयन् संकल्परूपं तपः कृतवानित्यर्थः। [मनः परामर्शि तत्पदं ?] 'मृदब्रवीत्' इत्यादिवत् तदभिमानिदेवतापरं द्रष्टव्यम्। तत् प्रामूर्च्छत्। तत् मनः समुच्छ्रितं विस्मृ(तं ?) तममवदित्यर्थः। 'मूर्च्छा मोहसमुच्छ्राययोः' इति हि धातुः।

तत् षट् ... मनश्चितः। तन्मन एव-षट्त्रिंशत्सहस्रदिनात्मकपुरुषायुषान्तर्गतैकैकदिनप्रभवमानसवृत्तिसंघाता अग्नित्वदृष्ट्या उपास्यमाना मनश्चितः। [तान् ?] आत्मनस्संबन्धिनः अर्कान् अर्चनीयान् मनोमयान् मनोनिष्पाद्यानपश्यदित्यर्थः। 'कर्मण्यग्न्याख्यायाम्' इति

मूर्ततरमिति। इत्थं चिताग्निरूपरूपमूर्ततुल्यमनोमयमनश्चिदाद्यनेकाग्निसंपादकत्वादस्य मूर्ततरत्वम्। मानसवृत्तिसंघाता इति। ननु मनश्चित्पदस्वारस्यानुरोधेन मनस एवाग्नित्वम्। तस्यैव तत्तद्दिनावच्छिन्नत्वेन भेदकल्पनया अनेकत्वोपपत्तेरिति चेत्—उपरि, 'सर्वाणि भूतानि चिन्वन्त्यपि स्वपते' इति प्राणिप्रयत्नसाध्यत्वस्य स्पष्टमवगमात् मनसस्तदभावात् मनोव्यापारग्रहणम्। एवञ्च भेदकल्पनक्लेशोऽपि नेति।

मनश्चीयत इत्यर्थे क्विप् । श्येनचिदादिशब्दवत् असौ क्विबन्तो निष्पन्नः । मनश्चितो नामाग्नय इति यावत् ।

क्विबन्तो निष्पन्न इति । अतः इष्टकचितशब्दवत् अयमकारान्त इति न मन्तव्यम् । उपरि मनश्चित्सु इति प्रयोगोऽप्यस्ति । एवं वाक्चित इत्यादिरपि क्विबन्त एव । सर्वोऽयं तकारान्तबहुवचनान्तः । न तु इष्टकचितशब्दवत् अकारान्तैकवचनान्तः । इष्टकचित इत्यस्य इष्टकाभिश्चित इति विग्रहः । 'इष्टकेषीकामालानां चिततूलभारिषु' इत्यनुशासनात् चितशब्दे परे इष्टकाशब्दे ह्रस्वः । चितशब्दः तत्र क्तान्तः । मनश्चित्पदं तु श्येनचित्पदवत्, 'कर्मण्यग्न्याख्यायाम्' इति सूत्रनिष्पादितम् । तत्र कर्मणीत्यनुवर्तते । कर्मणि उपपदे कर्मकारकरूपार्थे चिनोतेः क्विप् स्यात् अग्निवाचित्वे इति तदर्थः । अग्निरत्र आहवनीयाग्न्याधारस्थण्डिलविशेषः । एवञ्चात्र चित् इत्यस्य चितशब्दस्येव चयनकर्मार्थकत्वेऽपि तदुपपदभूतमनःश्येनादिशब्दाः इष्टकाशब्दवत् न चयनकरणवाचकाः; किन्तु चीयमानवस्तुपराः । 'श्येनचितं चिन्वीत' इत्यस्य हि श्येन इव यो भवति अग्निश्चीयमानः, तमग्निं चिन्वीतेत्यर्थः । आहवनीयाधारभूतस्थलविशेषस्य श्येनपक्षिसमानाकारतया निर्माणात् श्येनपक्षिणः चीयमानस्थलस्य चाभेदारोपात् श्येनचित् इति तत् स्थलमुच्यते । तद्वत् मनश्चित् इत्यत्रापि मनसः, मतौ वस्तुतश्चीयमानस्याग्नेश्चाभेदारोपो द्रष्टव्यः । तत्र, 'षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीन्' इति मनस्संयन्धिषु षट्त्रिंशत्सहस्रेषु अग्नित्वकथनात् मनोव्यापारसंघाताः तावन्त एवाग्नय इति मनश्चिदित्यत्र मनःपदं तादृशसंघातपरं ग्राह्यम् । तेष्वेकैकसंघातेऽपि चित्याग्न्यभेदारोपः । व्यापारसंघातानामनेकत्वात् अग्न्यनेकत्वाद् चित इति बहुवचनम् । अत्रायं विशेषः—श्येनचिदित्यादौ श्येनस्य अग्निरूपस्थानस्य च मूर्तत्वात् अग्नौ श्येनतादात्म्यकल्पना श्येनसदृशाकारसंपादनेन क्रियते । इह तु मनोव्यापाराणाममूर्ततया

तेषु मनसैवाऽऽधीयन्त। मनसाऽचीयन्त। मनसैषु ग्रहा अगृह्यन्त। मनसाऽस्तुवत। मनसाऽशँसन्।

तेषु—। एषु मनश्चिदाद्यग्निषु उपयुक्ताग्न्या(न्या ?)धानचयनग्रहणस्तोत्रशस्त्राण्यपि मनोनिष्पाद्यान्येवेत्यर्थ। ननु सर्वेषां मनोव्यापाराणामग्नित्वदृष्ट्या क्रोडीकृतत्वात् आधानचयनग्रहणस्तोत्रशस्त्रादिदृष्टिविषयो मनोव्यापारो नास्तीति शङ्क्यम्--केषाञ्चित् व्यापाराणामग्नित्वदृष्ट्या क्रोडीकारस्य केषाञ्चित् तदुपयोग्याधानचयनस्तोत्रादिव्यापारत्वेन क्रोडीकारस्य वा (च ?) संभवात् नानुपपत्ति।

तद्दशाकारसंपादनायोगात् अभेदारोपमात्रम्। तत्रापि क्रतावुपयुज्यमाने स्थलविशेषरूपाग्नौ क्रतुकाले मनोव्यापारतादात्म्यभावनेति न मन्तव्यम्; 'मनोमयेषु मनश्चित्सु मनोमयमक्रियत' इति अग्नेर्मनोमयत्ववेदनेन पूर्वोक्तमानसव्यापारसंघाते अग्निरूपस्थलविशेषस्यारोपणपूर्वकं तत्र अग्नौ कर्तव्यग्रहकार्यक्रियमाणत्वभावनाया ज्ञापनात्। तथा च मनश्चित इत्यस्य अग्नित्वेन भावनीयान् मानसव्यापारसंघातानित्यर्थः पर्यवस्यति। मूले अग्नीनिति पदं स्पष्टार्थं प्रयुक्तम्। अग्न्याख्यायामेव किञ्चिद्विधानात चित्पदेनैव तत्सिद्धेः।

आधानेति। मूले मनसैवाधीयन्त इत्यत्र आधीयन्त इत्येव पदच्छेदात् आधानमेव वक्तुं शक्यम्, नान्यत्। तथैवोपरि, तान्येवादधतीति च वक्ष्यते। आधानचयनादीनां भावनामात्ररूपाणामत्र कथनात् वास्तवाधानचयनादिकं नास्तीति सिद्ध्या क्रत्वन्तर्गते चित्याग्नौ न मनोव्यापारादिभावना। अत एव वास्तवचयनाद्यभावात् नात्र वास्तवक्रतुरपीति लभ्यते।

तर्हि भावितानामग्नि-आधान-चयन-ग्रहणादीनां कुत्रोपयोग ? किं पूर्वोक्तक्रतिपयमात्रं भावनीयम्, उतान्यदपीति जिज्ञा-

यत् किं च यज्ञे कर्म क्रियते, यत् किं च यज्ञियं कर्म, मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियत ।

तद्यत् किंचेमानि भूतानि मनसा संकल्पयन्ति, तेषामेव सा कृतिः। तानेवादधति, तांश्चिन्वन्ति तेषु ग्रहान् गृह्णन्ति, तेषु स्तुवते; तेषु शंसन्ति। एतावती वै मनसो विभूतिरेतावती विसृष्टिरेतावन्मनः ।

यत् . अक्रियत । यज्ञप्रयोगे यत् प्रधानं कर्म क्रियते, यच्च यज्ञोपयुक्तं तदङ्गभूतं कर्म ग्रहणस्तोत्रशस्त्रादिकम्, तत् सर्वं मनोमयेषु मनश्चित्सु मनसैव मनोमयमक्रियतेत्यर्थः ।

तद्यद्...कृतिः । तत् तस्मात् लोके सर्वैः भूतैः क्रियमाणा मनोव्यापाराः सर्वेऽपि एतन्निष्पाद्यानां निद्यामयानां मनश्चितां निष्पादकव्यापारा इत्यर्थः । मनोव्यापारत्वावच्छिन्नेषु सर्वेषु क्रियमाणाया अग्निरचष्टेः सकलमनोव्यापाराश्रिततया सर्वेषां मनोव्यापाराणां स्वाध्यस्ताग्निनिष्पादकत्वादिति भावः ।

तानेव शंसन्ति । सर्वाणि भूतानि विदुषा सपाद्येषु मनश्चित्सग्निषु उपयुक्तानि आधानचयनग्रहणस्तोत्रशस्त्राणि निष्पादयन्तीत्यर्थः । एतावती...मनः । मनस एतेऽन्वयः । सर्वे तदधीनाः तत्कार्यभूता एव इत्थम् हात्म्यशालिन इत्यर्थः ।

सायामुच्यते यत् किंचेति । यज्ञाय कर्मेति प्रयोक्तव्ये यज्ञे कर्मेति प्रयोगात् यज्ञपद, 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इत्यत्रेव प्रयोगपरमिति विज्ञादित भावप्रकाशिकायाम् । यद्वा यज्ञपदं यथाश्रुतमेवास्तु । यज्ञ-कत्व रासत्वर्थः । यज्ञो हि नाम प्रक्षेपात्मको देवतोद्देश्यको द्रव्यत्यागः । तथा च यज्ञस्वरूपान्तर्गतमुद्देशत्यागादिरूपं कर्मेति यज्ञे कर्मत्यस्यार्थः । तेन प्रधानकर्मसंग्रहणम् । अङ्गं सर्वं यज्ञियं कर्मत्यनेन गृह्यते ।

षट्त्रिँशत् सहस्राण्यग्नयोऽर्काः। तेषामेकैक एव तावान् यावानसौ पूर्वः ॥ ३ ॥

तन्मनो वाचमसृजत। सेयं वाक् सृष्टाऽऽविर्बुभूषन्निरुक्ततरा मूर्ततरा। साऽऽत्मानमन्वैच्छत्। सा तपोऽतप्यत। सा प्रामूर्च्छत्। सा षट्त्रिँशतँ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान् वाङ्मयान् वाक्चितः

षट्....पूर्वः। षट्त्रिंशत्सहस्रसंख्याकानामर्चनीयानामग्नीनामेषां मध्ये एकैकोऽप्यग्निः पूर्वोक्तेष्टकचिताग्निसदृश इत्यर्थ.। इष्टकचितस्याग्नेः स्वाङ्गिभूतक्रतुद्वारेण यत् फलम्, तदेव मनश्चिदादीनामपि विद्यामय-क्रतुद्वारेण फलमित्यर्थ.। एवमुत्तरत्रापि ॥ ३ ॥

वाक्चितः— वागिन्द्रियव्यापारा·।

वाक्चितो वागिन्द्रियव्यापारा इत्यादि। मनश्चिच्छब्दे उक्तया रीत्या वाक्चिच्छब्दादिपदेष्वपि व्युत्पत्तिः प्रदर्शनीयेति, 'आत्मनोऽग्नीनर्कान् वाङ्मयान्' इति वाक्संबन्धिषु वाग्विकारेषु अग्नित्वकथनबलेन वाक्पदं वाग्व्यापारपरम्, चित्पदं चयनकर्मभूताग्निपरम्, उभयोर-भेदारोपः इत्येव सिद्ध्यति। अथापि अग्निपदसमभिव्याहारादेव वाग्व्यापारेषु अग्न्यभेदलाभात् व्युत्पत्तिप्रदर्शनार्थं तावदुक्तापि अन्ततः वाग्व्यापारमात्रं वाक्चित्पदेनेह विवक्षितुं युक्तमिति निष्कृष्यैवमुक्तम्। रीतिरि[illegible] ष्पदेऽप्यन्ततो भाव्या, 'अग्नीन्... मनश्चितः' इत्यत्र। 'मनो[illegible]' इत्यत्र तु अग्नि[illegible]दान्तरा-

चित्पदमग्निसमर्प[illegible] इत्यादा[illegible] [illegible]था

ते वाचैवाऽऽधीयन्त वाचाऽचीयन्त वाचैषु ग्रहा अगृह्यन्त वाचाऽस्तुवत वाचाऽश[ँ]सन्। यत्किं च यज्ञे कर्म क्रियते, यत्किं च यज्ञियं कर्म, वाचैव तेषु तद्वाङ्मयेषु वाक्चित्सु वाङ्मयमक्रियत। तद्यत् किं चेमानि भूतानि वाचा वदन्ति, तेषामेव सा कृतिः। तानेवाऽऽदधति तांश्चिन्वन्ति तेषु ग्रहान् गृह्णन्ति तेषु स्तुवते तेषु श[ँ]सन्ति। एतावती वै वाचो विभूतिरेतावती विसृष्टिरेतावती वाक्। षट्त्रि[ँ]शत् सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान् यावानसौ पूर्वः ॥ ४ ॥

सा वाक् प्राणमसृजत। सोऽयं प्राणः सृष्ट आविरभूदिव निरुक्ततरो मूर्ततरः। स आत्मानमन्वैच्छत् स तपोऽतप्यत। स प्रामूर्च्छत्। स षट्त्रि[ँ]शत्[ँ]सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्प्राणमयान्प्राणचितः। ते प्राणेनैवाधीयन्त प्राणेनाचीयन्त प्राणेनैषु ग्रहा अगृह्यन्त प्राणेनास्तुवत प्राणेनाश[ँ]सन्। यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म प्राणेनैव तेषु तत् प्राणमयेषु प्राणचित्सु प्राणमयमक्रियत। तद्यत्किं चेमानि भूतानि प्राणेन प्राणन्ति तेषामेव सा कृतिः। तानेवाऽऽदधति तांश्चिन्वन्ति तेषु ग्रहान् गृह्णन्ति तेषु स्तुवते तेषु श[ँ]सन्ति। एतावती वै प्राणस्य विभूतिरेतावती विसृष्टिरेतावान् प्राणः। षट्त्रि[ँ]शत् पूर्वः ॥ ५ ॥

स प्राणश्चक्षुरसृजत। तदिदं चक्षुः सृष्टमाविरभूदिव निरुक्ततरं मूर्ततरम्। तदात्मानमन्वैच्छत् तत्तपोऽतप्यत तत् प्रामूर्च्छत्। तत् षट्त्रि[ँ]शत्[ँ]सहस्राण्यपश्यदात्मनोऽग्नीनर्कांश्चक्षुर्मयांश्चक्षुश्चितः। ते चक्षुषैवाऽऽधीयन्त चक्षुषाचीयन्त चक्षुषैषु ग्रहा अगृह्यन्त चक्षुषास्तुवत चक्षुषाश[ँ]सन् यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म

वाचैवेत्यादि। वाग्व्यापारात्मकेष्वग्निषु वाग्व्यापारात्मकानि कर्माणि वाचैवाक्रियन्त=वाग्व्यापारेणैवान्वासन्। वाग्व्यापार एव यज्ञसंबन्धिसमर्थरूपा भाव्या इति यावत्। (४) ॥ एवमग्रेऽपि।

चक्षुषैव तेषु तच्चक्षुर्मयेषु चक्षुश्चित्सु चक्षुर्मयमक्रियत । तद्यत्किं चेमानि भूतानि चक्षुषा पश्यन्ति तेषामेव सा कृतिः। तानेवाऽऽदधति तांश्चिन्वन्ति तेषु ग्रहान् गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै चक्षुषो विभूतिरेतावती विसृष्टिरेतावच्चक्षुः। षट्त्रिꣳशत्...पूर्वः॥६

तच्चक्षुः श्रोत्रमसृजत । तदिदꣳश्रोत्रꣳसृष्टमाविरबुभूषन्निरुक्ततरं मूर्ततरम्। तदात्मानमन्वैच्छत्। तत्तपोऽतप्यत तत्प्रामूर्च्छत् । तत्षट्त्रिꣳशतꣳसहस्राण्यपश्यदात्मनोऽग्नीनर्कान्श्रोत्रमयाञ्श्रोत्रचितः । ते श्रोत्रेणैवाऽऽधीयन्त श्रोत्रेणाचीयन्त श्रोत्रेणैषु ग्रहा अगृह्यन्त श्रोत्रेणास्तुवत श्रोत्रेणाशꣳसन्। यत्किंच यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म श्रोत्रेणैव तेषु तच्छ्रोत्रमयेषु श्रोत्रचित्सु श्रोत्रमयमक्रियत। तद्यत्किं चेमानि भूतानि श्रोत्रेण शृण्वन्ति तेषामेव सा कृतिः । तानेवाऽऽदधति तांश्चिन्वन्ति तेषु ग्रहान् गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्ति । एतावतीवै श्रोत्रस्य विभूतिरेतावती विसृष्टिरेतावच्छ्रोत्रम् । षट्त्रिꣳशत्.. ...पूर्वः ॥ ७ ॥

तच्छ्रोत्रं कर्मासृजत। तत्प्राणानभिसममूर्च्छदिमꣳसंदेव(?) मन्नस्संदेहमकृत्स्नं वै कर्मर्ते प्राणेभ्यः। अकृत्स्ना उ वै प्राणा ऋते कर्मणः ॥८

तदिदं कर्म सृष्टमाविरबुभूषत् निरुक्ततरं मूर्ततरम् । तदात्मानमन्वैच्छत् तत् तपोऽतप्यत तत्प्रामूर्च्छत् । तत्षट्त्रिꣳशतꣳसहस्राण्यपश्यदात्मनोऽग्नीनर्कान् कर्ममयान् कर्मचितः। ते कर्मणैवाऽऽधीयन्त कर्मणाचीयन्त कर्मणैषु ग्रहा अगृह्यन्त कर्मणास्तुवत कर्मणाशꣳसन्। यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म कर्मणैव तेषु तत्कर्ममयेषु कर्मचित्सु कर्ममयमक्रियत । तद्यत्किं चेमानि भूतानि कर्म कुर्वते तेषामेव सा कृतिः । तानेवाऽऽदधति तांश्चिन्वन्ति तेषु ग्रहान् गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्ति । एतावती वै कर्मणो विभूतिरेतावती विसृष्टिरेतावत्कर्म । षट्त्रिꣳशत् . पूर्वः ॥ ९ ॥

कर्मचितः—वागिन्द्रियातिरिक्तकर्मेन्द्रियव्यापाराः ।

तत् कर्माग्निमसृजत । आकृत्स्नो वा अग्निः कर्मणा । कर्मणा ह्येनं जनयन्ति ; कर्मणेन्धते ॥ १० ॥

सोऽयमग्निः सृष्ट आविर्बुभूषत् निरुक्ततरो मूर्ततरः । स आत्मानमन्वैच्छत् स तपोऽतप्यत स प्रामूर्च्छत् स षट्त्रिँशतँ सहस्राण्यपश्यदात्मनोऽग्नीनर्कानग्निमयान्चित । तेऽग्निमया आऽधीयन्ताग्निमाचीयन्ताग्निषु ग्रहा अगृह्यन्ताग्निनास्तुवताग्निनाशँसन् । यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म अग्निनैव तेषु तदग्निमयेष्वग्नि-चित्स्वग्निमयमक्रियत । तद्यत्किं चेमानि भूतान्यग्निमिन्धते तेषामेव सा कृतिः । तानेवाऽऽदधति तांश्चिन्वन्ति तेषु ग्रहान् गृह्णन्ति तेषु स्तुवते तेषु शँसन्ति । एतावती वा अग्नेर्विभूतिरेतावती विसृष्टिरेतावानग्निः । षट्त्रिँशत्सहस्राण्यग्नयोऽर्काः ; तेषामेकैक एव तावान् यावानसौ पूर्वः ॥ ११ ॥ ते हैते विद्याचित एव । तान् हैनानेवंविदे सर्वदा सर्वाणि

अग्निचितः जाठराग्निव्यापाराः । ते हैते विद्याचित एव । एते मनश्चिदादयः सर्वेऽपि विद्याचितः विद्यार्थाः चिता इत्यर्थः । न तु मनश्चिदादीनामेव विद्यारूपचित्त्व (चित्त्वमेव ?) बोध्यते । तस्य सिद्ध-त्वेन विद्याचित एवेत्यवधारणवैयर्थ्यप्रसङ्गात् । अतो विद्याचित एवे-त्यस्य, विद्यामयमानसग्रहादेः क्रियामयद्वादशाहादिकार्यत्ववत् विद्या मयस्य मनश्चिदादेः प्रसक्तस्य क्रियामयकार्यत्वस्य प्रतिषेधार्थत्वमेव ॥

तान् ह स्वपते । एवंविदे विद्यामयक्रतुमते आसते स्वपते च सर्वाणि भूतानि सर्वदा अग्निं चिन्वन्तीत्यर्थः । सार्वकालिकसर्वभूत-

---

तस्य सिद्धत्वेनेति । "वाङ्मनश्चक्षुरादिव्यापाराणामिष्टकादिवत् चयनानुपपत्तेर्मनसा सम्पादिताग्निचयेन विद्यारूपत्वे सिद्धेऽपि" इति भाष्योक्तरीत्या सिद्धत्वेनेत्यर्थः ।

स्वपते इत्येतत् एवंविदे इत्यस्य विशेषणम् ।

भूतानि चिन्वन्त्यपि स्वपते । विद्यया हैवैत एवंविदश्चिता भवन्ति ॥१२॥

कर्तृकमनोव्यापाराः अग्नित्वदृष्टिविशिष्टा विद्यावत्पुरुषशेषभूताः चयन रूपा एवाऽऽसन्नित्यर्थः । अत्र सर्वभूतकर्तृकसर्वकालव्यापिमनोव्यापार रूपाग्नेः परिमितकालकर्तृकक्रियामयक्रत्वनुप्रवेशासामर्थ्यात् विद्यामयक्रत्वनुप्रवेशसामर्थ्याच्च मनश्चिद्रूपोऽग्निः न मानसग्रहवत् क्रियामयक्रत्वनुप्रवेशी ; अपि तु विद्यामयक्रत्वनुप्रवेशीति द्रष्टव्यम् । ते हैते विद्याचित एवेत्येतद्वाक्यं विवृणोति **विद्यया हैवैत एवं विदश्चिता भवन्ति ।** एवंविद पुरुषस्य "**विद्यया** विद्यामयेन क्रतुना संबद्धाः मनश्चिदादयः चिता भवन्तीत्यर्थ" इति भगवता भाष्यकृतोक्तम् । "अत्र विद्ययेति विद्या प्रयोजनतया हेतुः । विद्यार्थं चिता इत्यर्थ" इति व्यासार्यैर्व्याख्यातञ्च । अत्र **विद्यया हैवैत** इति वाक्यस्य **ते हैते विद्याचित एवेति** वाक्यविवरणरूपत्वस्य भाष्य एवाविष्कृतत्वात् विद्याचित एवेत्यस्यापि विद्यार्थं चित इति पूर्वोक्त एवार्थ इत्यर्थः ॥

इति मनश्चिदाद्यग्निविद्यामयक्रतुब्राह्मणप्रकाशिका ॥

विद्यार्थं चित इति पूर्वोक्त एवार्थ इति । ननु कर्मण्यग्न्याख्यायामिति सूत्रत एव श्येनचिदादिवत् विद्याचिदादेरपि निष्पाद्यमिति विद्यार्थं चित इति कथम्? सत्यम् । अथाप्यत्र विद्यापदं न मनोव्यापारवाग्व्यापारादिगताग्नित्वभावनापरम् । अग्नित्वभावनायां चित्पदार्थाग्न्यभेदानन्वयात् । मनश्चितः वाक्चितः इत्यादिषु व्यापारेष्वग्न्यभेदारोपस्यैव प्रागुक्तत्वात् । चित्पदार्थाग्न्यभेदारोपस्य मनोव्यापारादिगताग्नित्वभावनायां पुनरुक्तत्वाच्च । अतः विद्यापदं भावनाविषयव्यापारलाक्षणिकं वाच्यम् । अग्नित्वभावनारूपविद्याविषयभूता व्यापाराः चित्पदार्थभूताश्च इत्युक्तं भवति । अत्राप्या-

१०. ५. ४.

अयं वाव लोक एषोऽग्निश्चितः ।
तस्याप एव परिश्रितो मनुष्या यजुष्मत्य इष्टकाः [पशवः?]सूददो-

अग्निहोत्रम्हृत्यानि[?]पणि उपासनान्तर प्रवुच्यन्ते अय वाव... चितः एष चितोऽग्नि अय लोकः भूलोक इत्यर्थः । भूलोकदृष्टिः कर्तव्येति यावत् ।

तस्याऽऽप एव परिश्रितः । 'अप अनुजानति परिविशति' इति निर्दिष्टाग्निपरिषेच-जलेषु परिश्रिच्छदिस्तपु समुद्रजलदृष्टिः कार्येत्यर्थः । मनुष्या यजुष्मत्य इष्टकाः । यजुर्मन्त्रोपधेयेष्टकासु मनुष्यत्वबुद्धिः

प्रेडन[?] वस्ति अर्थस्य । अतो विद्यापदं विज्ञानमूलकोपासनादिपरम् । तत्र चित्यर्थभेदः विद्याचित् इतीनोक्तम् । तथा च त एते अग्नित्वेनाभिमन्यमान-विद्यार्थव्यापारा एवेति प्रकृतपूर्वस्यार्थः । तत्र विद्यार्थ-मांशस्य एवकारेणावधारणम् । एवं श्रुतौ विद्यापदस्य विद्यार्थ-व्यापारपरत्वादेव नवैनार्थविवक्षया सवकारेणापि विद्यैव तु इति विद्यापदप्रयोगः, तत्प्रतिनिर्देशरूपत्वात् पूर्वपक्षे क्रियार्थव्यापारस्वार्थे क्रियापदप्रयोगश्चेत्यवधेयम् । "विद्ययेति प्रयोजनतया हेतुः" इति व्याख्यायव्याख्यानमपि पर्यवसान तुल्य न तु विद्यार्थं चित इति विग्रहाभिप्रायेण । अनुष्ठानस्यानुरोधत्वात् । श्रीभाष्येऽपि विद्यार्थमिति अनापि-त्या. "विद्यया विद्यामयेन कतुना संपद्य : चिता भवन्ति" इत्यर्थेन यथा विद इति इत्यत्र विद्यापदं विद्यासंस्थाय लाक्षणिकमिति स्पष्ट दर्शयति । संनद्धयास्ववृत्तादिरित्यः विद्यार्थत्वरूप एव । 'विद्यया हैवैते एवंविदश्चिता भवन्ति' इति पञ्चमे विद्ययेति इत्थम्भूतलक्षणे तृतीया । विद्यासंनद्धा एते चिता भवन्तीति भाष्यानुसारेणार्थः । अतः टीकोक्तं प्रयोजनत्वमार्थिकम् ।

हा ओषधयश्च वनस्पतयश्च पुरीषमाहुतयः समिधोऽग्निर्लोकम्पृणा ।
तद्वा एतत् सर्वमग्निमेवाभिसम्पद्यते । तत् सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते ।

कर्तव्येत्यर्थः । **पशवः सूददोहाः** । सूददोहाः-'सूदपेदकः दोहः ता अस्य सूददोहसः' इत्युपधेया इष्टकाः । अग्न्यर्थेषु सूददोहेषु पशुत्वबुद्धिः कार्येत्यर्थ ।

ओषधयश्च वनस्पतयश्च पुरीषम् । इष्टकासन्ध्याच्छादनार्थ गोमयेषु ओषधिवनस्पतित्वबुद्धिः कार्येत्यर्थः । **आहुतयः समिधः** । स्थण्डिलाग्नौ क्रियमाणासु आहुतिषु इन्धनत्वबुद्धिः कर्तव्या । **अग्निर्लोकम्पृणा** । भूततृतीयरूपोऽग्निः लोकंपृणच्छिद्रंपृणेति मन्त्रोपधेया इष्टकेत्यर्थः । 'पृण प्रीणने' इत्येतस्मात् तौदादिकात् लोकं पृणतीत्ये तस्मिन्नर्थे मूलविभुजादित्वात् कप्रत्यये, 'लोकस्य पृणे मुं वक्तव्यम्' इति मुमागमे स्त्रीत्वात् टापि लोकम्पृणेति रूपसिद्धिः ।

तद्वा एतत् सर्वमग्निमेवाभिसंपद्यते । 'अयं वाव लोक' इत्यादिनिर्दिष्टं भूलोकसमुद्रजलमनुष्यपश्वादिकं सर्वं भूततृतीयमग्निमेवाभिसंपद्यते । अग्निलीनं भवतीत्यर्थ । **तत् सर्वोऽग्निर्लोकम्पृणा**

'पृण प्रीणने' इति पाठः शुद्धः ; न तु प्रीण प्रीणन इति । न चात्र दर्शिता प्रक्रिया पूर्वविकल्पाधिकरणान्तिमसूत्रश्रुतप्रकाशिकाविरुद्धेति वाच्यम्—तत्र दृश्यमानस्य टीकापाठस्य अशुद्धत्वात् लोकम्पृणारूपसुप्रसिद्धेप्रकाविषयत्वात् मूलस्य । लोकम्पृणाया लोकम्पृणात्वम्, छिद्रम्पृणाशब्द इव चयनभूप्रदेशपूरकत्वरूपार्थे तस्य शब्दस्य व्युत्पत्तिप्रदर्शनेन कामं वर्ण्यताम् । विवक्षितो वाक्यार्थः पुनरयमिति ।

स यो हैतदेवं वेद लोकम्पृणामेनं भूतमेतत्सर्वमभिसम्पद्यते ॥१

अन्तरिक्षꣳह त्वेवैषोऽग्निश्चितः। तस्य द्यावापृथिव्योरेव संधिः परिश्रितः। परेण ह्यन्तरिक्षं द्यावापृथिवी संधत्तः। ताः परिश्रितो वयाꣳसि यजुष्मत्य इष्टका वर्षꣳसूददोहा मरीचयः पुरीषमाहुतयः समिधो वायुर्लोकम्पृणा। तद्वा एतत्सर्वं वायुमेवाभिसम्पद्यते। तद् सर्वोऽग्निर्लो पद्यते ॥ २ ॥

द्यौर्ह त्वेवैषोऽग्निश्चितः। तस्याप एव परिश्रितो यथा ह वा इदं कोशः समुच्छ्रित एवमिमे लोका अप्स्वन्तस्तद्या इमाँल्लोकान् परेणापस्ताः परिश्रितो देवा यजुष्मत्य इष्टका यदेवैतस्मिल्लोकेऽन्नं तत्सूददोहा नक्षत्राणि पुरीषमाहुतयः समिध आदित्यो लोकम्पृणा तद्वा एतत्सर्वमादित्यमेवाभिसम्पद्यते। तत्सर्वोऽग्निर्लो पद्यते ॥ ३ ॥

आदित्यो ह त्वेवैषोऽग्निश्चितः। तस्य दिश एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं दिशः समन्तं परियन्ति रश्मयो यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यस्य रश्मय-

---

मभिसपद्यते। 'एषोऽग्निश्चित'इत्यादिनिर्दिष्ट सर्वावयवयुक्तोऽग्नि लोकम्पृणामिष्टका प्राप्य समाप्तो भवतीत्यर्थं। लोकम्पृणाया पूरणार्थत्वेन तदनन्तरत्वादग्निसमाप्तेरित्यर्थं। ततश्च सर्वाभिसंपत्तिकर्मभूते भूतनृत्ती यामौ सर्वावयवयुक्तस्थण्डिलाग्न्यभिसंपत्तिकर्म(धर्म)भू-लोकम्पृणादृष्टिरपद्यत इति भाव

स यो हैतदेव...सर्वमभिसंपद्यते। एवम्-उक्तेन प्रकारेण एतत् एतमग्निम्—लिङ्गवचनव्यत्ययश्छान्दस —लोकम्पृणा यो वेद, एनं विद्वांसं एतत् सर्वं तमभिसंपद्यते। शेषभूततया आश्रयतीत्यर्थं। एवमुत्तरेष्वपि। उत्तरलोपयोगमान्यात् नार्थो लिख्यते।

स्तद्यत्परिश्रित्सु यजुष्मतीः प्रत्यर्पयति रश्मींस्तद्दिक्षु प्रत्यर्पयत्यथ यद्न्तरा दिशश्च रश्मींश्च तत्सूददोहाः अथ यद्दिक्षु च रश्मिषु चान्नं तत्पुरीषं ता आहुतयस्ताः समिधोऽथ यद्दिश इति च रश्मय इति चाख्यायते तल्लोकम्पृणा । तद्वा एतत्सर्वं दिश इति चैव रश्मय इति चाख्यायते । तत्सर्वोऽग्निर्लो . ॥ ४ ॥

नक्षत्राणि ह त्वेवैषोऽग्निश्चितः । तानि वा एतानि सप्तविँशतिर्नक्षत्राणि सप्तविँशतिः सप्तविँशतिर्ह्येवोपनक्षत्राण्येकैकं नक्षत्रमनूपतिष्ठन्ते तानि सप्त च शतानि विँशतिश्चाधिषट्त्रिँशत्ततो यानि सप्त च शतानि विँशतिश्चेष्टका एव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्मत्योऽथ यान्यधिषट्त्रिँशत् स त्रयोदशो मासः स आत्मा त्रिँशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव षट्त्रिँश्यौ तद्यत्ते द्वे भवतो द्व्यक्षरँ हि शिरोऽथ यदन्तरा नक्षत्रे तत्सूददोहा अथ यन्नक्षत्रेष्वन्नं तत्पुरीषं ता आहुतयस्ताः समिधोऽथ यन्नक्षत्राणीत्याख्यायते तल्लोकम्पृणा । तद्ध एतत्सर्वं नक्षत्राणीत्येवाख्यायते । तत्सर्वोऽग्निर्लो ॥ ५ ॥

ता वा एता एकविँशतिर्बृहत्यः । एकविँशो वै स्वर्गो लोको बृहती स्वर्गो लोकः। तदेव स्वर्गं लोकमभिसम्पद्यत एकविँशं च स्तोमं बृहतीं च छन्दः ॥ ६ ॥

छन्दाँसि ह त्वेवैषोऽग्निश्चितः। तानि वा एतानि सप्त छन्दाँसि चतुरुत्तराणि तृचानि तेषाँ सप्त च शतानि विँशतिश्चाक्षराण्यधि षट्त्रिँशत्ततो यानि सप्त च शतानि विँशतिश्चेष्टका एव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्मत्योऽथ यान्यधि षट्त्रिँशत् स त्रयोदशो मासः स आत्मा त्रिँशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव षट्त्रिँश्यौ तद्यत्ते द्वे भवतो द्व्यक्षरँ हि शिरः ॥ ७ ॥

तस्यै वा एतस्य षटत्रिँशदक्षरायै बृह त्यै यानि दश प्रथमान्यक्षराणि सा दशाक्षरैकपदा । यानि विँशति सा विँशत्यक्षरा द्विपदाथ यानि त्रिँशत् सा त्रिँशदक्षरा विराडथ यानि त्रयस्त्रिँशत् सा त्रयस्त्रिँशदक्षराथ यानि चतुस्त्रिँशत् सा चतुस्त्रिँशदक्षरा स्वराडथ यत्सर्वश्छन्दोभिरयमग्निरित्रतस्तदतिच्छन्दास्ता उ सर्वा इष्टका एवेष्टकेति त्रीण्यक्षराणि त्रिपदा गायत्री तेनेष गायत्रोऽग्निर्मृदाप इति त्रीण्यक्षराणि त्रिपदा गायत्री तेनो एवैष गायत्रोऽथ यदन्तरा छन्दसी तत्सूददोहा अथ यच्छन्दस्सन्न तत्पुरीष ता आहुतयस्ता समिधोऽथ यच्छन्दाँसीत्याख्यायते तल्लोकम्पृणा । तद्वा एतत्सर्वं छन्दाँसीत्येवाख्यायते । तत्सर्वोऽग्निर्लो ॥ ८ ॥

ता वा एता एकविँशतिर्बृहत्य । एकविँशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यत एकविँश च स्तोम बृहतीं च छन्द ॥ ९ ॥

सवत्सरो ह त्वेवैषोऽग्निश्चित । तस्य रात्रय एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि सवत्सरस्य रात्रयोऽहानि यजुष्मत्य इष्टकास्ता षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि सवत्सरस्याहान्यथ या अमू षटत्रिँशदिष्टका अतियन्ति य स त्रयोदशो मास आत्माऽर्धमासाश्च ते मासाश्च चतुर्विँशतिरर्धमासा द्वादश मासा अथ यदन्तराहोरात्रे तत्सूददोहा अथ यदहोरात्रयन्न तत्पुरीष आ आहुतयस्ता समिधोऽथ यदहोरात्राणीत्याख्यायते तल्लोकम्पृणा । तद्वा एतत्सर्वमहोरात्राणी येवाख्यायते । त सर्वोऽग्निर्लो ॥ १० ॥

ता वा एता एकविँशतिर्बृहत्य । एकविँशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यते एकविँश च स्तोम बृहतीं च छन्द ॥ ११ ॥

आत्मा ह त्वेवैषोऽग्निश्चित । तस्यास्थीन्येव परिश्रितस्ताः

षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्यास्थीनि मज्जानो यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्य मज्जानोऽथ या अमूः षट्त्रिꣳशदिष्टका अतियन्ति यः स त्रयोदशो मास आत्मा प्राणः स तस्य त्रिꣳशदात्मन्विधाः प्रतिष्ठायां द्वे प्राणेषु द्वे शीर्षन्द्वे तयत्ते द्वे भवतो द्विकपालꣳहि शिरोऽथ येनेमानि पर्वाणि संततानि तत्सूददोहा अथैतत्तूयं येनायमात्मा प्रच्छन्नो लोमानि तत्ससमिति तत्पुरीषं यत्पिबति ता आहुतयो यदश्नाति ताः समिधोऽथ यदात्मेस्याकाशते तल्लोकम्पृणा । तद्वा एतत्सर्वमात्मेत्येवाख्यायते । तत्सर्वोऽग्निर्लो ॥ १२ ॥

ता वा एता एकविꣳशतिर्बृह ॥ १३ ॥

सर्वाणि ह त्वेव भूतानि सर्वे देवा एषोऽग्निश्चितः । आपो वै सर्वे देवाः सर्वाणि भूतानि ता हैता आप एवैषोऽग्निश्चितस्तस्य नाव्या एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्याः समन्तं परियन्ति नाव्या उ एव यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्या अभिक्षरन्त्यथ यदन्तरा नाव्ये तत्सूददोहा अथ या अमूः षट्त्रिꣳशदिष्टका अतियन्ति यः स त्रयोदशो मास अयमेव स योऽयꣳहिरण्मयः पुरुषः ॥ १४ ॥

तस्यैते प्रतिष्ठे रुक्मश्च पुष्करपर्णं चापश्चादित्यमण्डलं च सुचौ याहु ताविन्द्राग्नी द्वे स्वयमातृण्णे इयं चान्तरिक्षं च तिस्रो विश्वज्योतिष एता देवता अग्निर्वायुरादित्य एता ह्येव देवता विश्वज्योतिर्दादिर्ताव्याः स संवत्सरः स आत्मा पञ्च नाकसद पञ्च पञ्चचूडा. स यजस्ते देवा अथ यच्छिद्रणी च स्वयमातृण्णा चाश्मा पृश्निर्यश्चितेऽग्निर्निधीयते सा पञ्चविꣳशी लोकम्पृणार्थे यजुः षट्त्रिꣳशी सोऽस्यैव सर्वस्यात्मेवात्मा स एष सर्वेषामेतां मर्त्ये स

एष सर्वैः कामैः सम्पन्न आपो वै सर्वे कामाः । स एषोऽकामः सर्वकामो न ह्येतं कश्चन काम ॥ १५ ॥ तदेष श्लोको भवति—

विद्यया तदारोहन्ति यत्र कामाः परागताः ।
न तत्र दक्षिणा यान्ति नाविद्वाꣳसस्तपस्विन. ॥ इति ।

न हैव तं लोकं दक्षिणाभिर्न तपसाऽनेवंविदश्नुते ।] एवंविदाꣳहैव स लोकः ॥ १६ ॥

अग्नेः पुरीषम् चन्द्रमा आहुतयो नक्षत्राणि समिधो यच्चन्द्रमा नक्षत्रे वसत्याहुतिस्त समिधि वसत्येतद् वा आहुतेरन्नमेषा प्रतिष्ठा तस्मादाहुतिर्न क्षीयते एतद्ध्यस्या अन्नमेषा प्रतिष्ठाऽथ यद्देवा इत्याख्यायते तल्लोकम्पृणा । तद्वा एतत्सर्वं देवा इत्येवाख्यायते ॥१७

तदेतदृचाऽभ्युक्तम्—विश्वे देवा अनु तत्ते यजुरिति। सर्वाणि ह्यत्र भूतानि सर्वे देवा यजुरेव भवन्ति। तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते । स यो हैतदेवं वेद लोकम्पृणामेव भूतमेतत्सर्वमभिसम्पद्यते ॥ १८ ॥

ता वा एताः एकविꣳशतिर्बृहत्य । एकविꣳशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यत एकविꣳश च स्तोमं बृहतीं च छन्दः ॥ १९ ॥

विद्यया तदारोहन्तीति । अत्र चित्याग्निनिरूपणप्रकरणे देवयानश्रवण प्रासङ्गिकम् अहीननयात् पञ्चविद्याप्रकरणान्वयि स्यात् इति कार्याधिकरणश्रुतप्रकाशिकायामुक्तम्। अत्र अहीननयादित्यस्य, 'तिस्र एव साह्नस्योपसदः, द्वादशाहीनस्य' इति ज्योतिष्टोमप्रकरणे द्वादशोपसत्त्वश्रवणेऽपि अहीनपदमुख्यार्थानुरोधेन प्रकृतज्योतिष्टोमानन्वितस्य तस्य द्वादशोपसत्त्वस्य अहीने उत्कर्ष इति (३ ३ ८) पूर्वमीमांसोक्तन्यायादित्यर्थ । तथा च विद्यया देवयानप्राप्तिर्यद्यपि अकामत्वे पुनः संपन्ने सति संभाव्या, तादृशमकामत्व चित्याग्निविद्यया सर्वकामसंपन्नस्य भवति क्रमेणेतीहार्थोऽभिमत स्यात् ।

१०. ५. ५.

कुश्रिर्ह वाजश्रवसोऽग्निं चिक्ये । तँ होवाच सुश्रवाः कौष्यो गौतम! यदग्निमचैषीः, प्राञ्चमेनमचैषीः प्रत्यञ्चमेनमचैषीर्न्यञ्चमेनमचैषीरुत्तानमेनमचैषीः ॥ १ ॥

यद्यु हैनं प्राञ्चमचैषीः, यथा पराच आसीनाय पृष्ठतोऽन्नाद्यमुपाहरेत्, तादृक् तत् न ते हविः प्रतिग्रहीष्यति ॥ २ ॥

यद्यु वा एनं प्रत्यञ्चमचैषीः, कस्मादस्य तर्हि पश्चात्पुच्छमकार्षीः ॥

यद्यु वा एनं न्यञ्चमचैषीः । यथा नीचः शयानस्य पृष्ठेऽन्नाद्यं प्रतिष्ठापयेत् तादृक् तन्नैव ते हविः प्रतिग्रहीष्यति ॥ ४ ॥

यद्यु वा एनमुत्तानमचैषीः, न वा उत्तानं वयः स्वर्गं लोकमभिवहति, न त्वा स्वर्गं लोकमभिवक्ष्यत्यस्वर्ग्य उ ते भविष्यतीति ॥ ५ ॥

स होवाच—प्राञ्चमेनमचैषं प्रत्यञ्चमेनमचैषं न्यञ्चमेनमचैषमुत्तानमेनमचैषँ सर्वा अनु दिश एनमचैषमिति ॥ ६ ॥

स यत्प्राञ्चं पुरुषमुपदधाति । प्राच्यौ स्रुचौ तत्प्राङ् चीयतेऽथ यत्प्रत्यञ्चं कूर्ममुपधाति प्रत्यञ्चि पशुशीर्षाणि तत्प्रत्यङ् चीयतेऽथ यन्न्यञ्चं कूर्ममुपदधाति न्यञ्चि पशुशीर्षाणि नीचीरिष्टकास्तन्न्यङ् चीयतेऽथ यदुत्तानं पुरुषमुपधात्युत्ताने स्रुचावुत्तानमुलूखलमुत्तानामुखां तदुत्तानश्चीयतेऽथ यत्सर्वा अनु दिशः परिसर्पमिष्टका उपदधाति तत्सर्वतश्चीयते ॥ ७ ॥ अथ ह स्मैषां धावयन्तः निरूढशिरसमग्निमुपाधावयाञ्चक्रुः तेषाँ हैक उवाच श्रीर्वै शिरः श्रियमस्य निरौहीत् सर्वज्यानिं ज्यास्यत इति । स ह तथैवास ॥ ८ ॥

अथ हैक उवाच । प्राणा वै शिरः प्राणानस्य निरौहीत्क्षिप्रेऽमुं (क्षिप्रममुं) लोकमेष्यतीति स उ ह तथैवास ॥ ९ ॥

ऊर्ध्वो वा एष एतच्चीयते । यद्दर्भस्तम्बो लोगेष्टकाः पुष्करपर्णँ रुक्मपुरुषौ स्रुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजूरेतःसिचौ विश्वज्योतिर्ऋतव्ये अषाढा कूर्मोऽथ हास्यैतदेव प्रत्यक्षतमाँ शिरो यदग्निमेऽग्निर्निधीयते तस्मान्न निरूहेत् ॥ १० ॥

इदञ्च चिन्तितं गुणोपसंहारपादे । तत्र-मनश्चिदादयो विद्यामया एव क्रियामयक्रत्वङ्गतया क्रिया एव । एषाञ्च चिन्तितानां फलाकाङ्क्षायां पूर्ववत्, 'असद्वा इदमग्र आसीत्' इतीष्टकचिताग्नेः प्रस्तुतत्वात् तस्य च क्रत्वव्यभिचारित्वेन क्रतूपस्थापकत्वात् तेन च क्रतोः संनिहिततया, सन्निहितेन क्रतुना एकवाक्यतयैव कल्प्यते । न च तस्य क्रतोरिष्टकचिताग्न्यविरुद्धत्वात् कथं तत्र विद्यामयस्य मनश्चिदादेरग्नेः समावेश इति वाच्यम्, विकल्पेन समावेशोपपत्तेः । न च—एककार्यत्व एव विकल्पः स्यात्, न हीष्टकचिताग्नेः विद्यामयमनश्चिदाद्यग्नेश्चैककार्यत्वं संभवति, इष्टकचिताग्निकार्यस्याग्निधारणस्य विद्यामयैर्मनश्चिदादिभिः कर्तुमशक्यत्वात्—इति वाच्यम्—'अन्यायानिप्रतिषेधात्'

वार्तिके—पश्वर्थत्वश्रवणादिति । वार्तिकतः पश्वर्थत्वस्यावगमादित्यर्थः । ननु चयनसंस्कृतस्थण्डिलविशेषरूपाग्नौ आहवनीयरूपाग्निनिक्षेपेण तत्र होमकरणात् अस्ति स्थण्डिलस्य यागसंबन्धः । ईदृशस्थण्डिलमन्तरेणापि यागः क्रियताम् । तदा उत्तरवेदिमात्रमाहवनीयाधारः । चयनपक्षे उत्तरवेद्याऽस्य समुच्चयः । तत्र, श्येनचितं चिन्वीत स्वर्गकामः इत्यादिवाक्यबलात् स्थण्डिलगतश्येनाकारतादेः फलं स्वर्गादीत्यपीष्यते । अथापि इष्टकचितस्याग्नेरपि पश्वादिफलार्थत्वेऽपि आहवनीयाधारतया यागोपकारकत्वात् गुणफलसंबन्धविधावर्णनसंभवात् क्रत्वाश्रितेन इष्टचितेन फलसिद्धिः सुवचा । न हि इष्टकचितस्येवाऽऽहवनीयाधारत्वं विद्यामयस्य संभवति । अतः क्रत्वाश्रितत्वस्य दुर्वचत्वे क्रतुमध्यनिवेशायोगात् कथं तेन सह विकल्प इति चेन्न—'तेषामेकैक एव तावान् यावानसौ पूर्वः' इति वाक्येन इष्टकचितकार्ये विद्यामयविनियोगात् आहव-

इति सूत्रे वार्तिके, 'पशुकामश्चिन्वीत' इत्यग्नेः पश्वर्थत्वश्रवणात् पश्वादि लक्षणफले विद्यामयस्यापि साधनत्वसंभवात् विकल्पोपपत्ते.। न च विद्यारूपस्य क्रियाङ्गत्वं न दृष्टमिति वाच्यम्—द्वादशाहे दशमेऽहनि अविवाक्य नामके विहितस्य मानसग्रहस्य विद्यामयस्यापि क्रियामयक्रत्वङ्गत्वदर्शनात्। किञ्च, 'तेषामेकैक एव तावान् यावानसौ पूर्वः' इति विद्यामयेषु मनश्चिदादिषु इष्टकचितामिकार्यातिदेशात् तद्वदेव क्रियामयक्रतूपकारका.—इति, "पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत्", "अतिदेशाच्च" इति द्वाभ्यां सूत्राभ्यां पूर्वपक्षं प्रापय्य सिद्धान्तितम्—

'विद्यैव तु निर्धारणात् दर्शनाच्च ।" मनश्चिदादिः विद्यैव = विद्यामयक्रत्वङ्गभूतेत्यर्थः । विद्यारूपत्वस्य पूर्वपक्षेऽपि सत्त्वेन तस्य असाधनीयतया विद्याशब्दस्य विद्यामयक्रतुशेषत्वार्थकत्वस्यैव युक्तत्वात्। **निर्धारणात्** = 'विद्याचित एव' इति निर्धारणादित्यर्थः । विद्यामया-

---

नीयाग्निधारणस्य साक्षादभावेऽपि तद्ध्यानमात्रस्य कार्यकारत्वस्वीकारात्। अस्तु वा दृष्टविधया इष्टकचितस्याहवनीयाधारत्वमिव विद्यामयस्यापि अदृष्टविधया तत्; वचनबलात्। नास्ति वचनस्यातिभार इति न्यायात्। मानसग्रहस्य मनसैव निष्पाद्यग्रहणासादनस्तोत्रशस्त्रादिकतया तत्र स्तोत्रशस्त्रादीनां स्वरूपेणासतां ज्ञानस्य वास्तवस्तोत्रशस्त्रादिवत् क्रतूपकारकल्पनवत् इहापि कल्पनस्य संभवात्। अग्निरहस्ये कर्मकाण्डे पाठानुबन्धादेव प्रकरणात् क्रतूपकारकल्पनं हि सुकरमिति पूर्वपक्ष्याशयात्। विद्याशब्दस्येति। सूत्रे लाक्षणिकविद्याशब्दप्रयोगः विद्याचित एवेति अत्यन्तरोधेनेति तदर्थविचारावसरे दर्शितमनुसंधेयम्।

नामेव मनश्चिदादीनां विद्याचित एवेत्युक्ति 'शेषिणोऽपि विद्यामयत्वमेव, न क्रियामयत्वम्' इति प्रतिपादयति। न च विद्यामय एव क्रतुरिति अत्र न दृश्यत इति वाच्यम्--'यत् किञ्च यज्ञे कर्म क्रियते, यत् किञ्च यज्ञियं कर्म' इति वाक्येन यज्ञानां तदङ्गानाञ्च मनोमयत्वप्रतिपादनेन विद्यामयक्रतोर्दर्शनाच्च विद्यामयक्रतुशेषत्वमेवेत्यर्थः।

ननु, 'यत् किञ्च यज्ञे कर्म क्रियते यत् किञ्च यज्ञियं कर्म, मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियत' इत्यत्र विद्यामयक्रतुप्रतीतावपि तत्र विध्यश्रवणात् न विद्यामयक्रतुशेषता, अपितु पूर्वप्रस्तुतेष्टकचिताग्न्युपस्थितत्वात् क्रियामयशेषत्वौचिती। अतो विद्यामयक्रतुशेषता बाध्यत इत्यत्राह—

"श्रुत्यादिबलीयस्त्वाच्च न बाधः"। श्रुतिलिङ्गवाक्यानां प्रकरणात् बलीयस्त्वेन श्रुत्याद्यवगतस्य विद्यामयक्रत्वन्वयस्य प्रकरणेन न बाधः कर्तुं

विध्यश्रवणादिति। नात्र विद्यामयक्रतुस्वरूपविधायकवाक्याभावो विवक्षितः। तत्सदसद्भावविचारस्य, 'अनुबन्धादिभ्य.' इत्युपरितनसूत्रे कार्यत्वात्। किन्तु पूर्वमुक्तं विद्यामयक्रतुं प्रति उक्तविधानामग्नीनामङ्गत्वबोधको विधिर्न श्रूयत इति। तथाच विनियोजकप्रमाणाभावात् न तदङ्गत्वम्। क्रियामयक्रत्वङ्गत्वं तु प्रकरणरूपप्रमाणात् भवतीति भाव.।

न शेषित्वश्रुतित्वमिति। शेषित्वमुद्देश्यत्वम्, शेषत्वञ्च तदतिरिक्तकृतिकारकत्वम्। तत्र यया विभक्त्या शक्त्योच्यते, सा श्रुतिः। अतो द्वितीयाविभक्तिः शेषित्वे श्रुतिः; यथा व्रीहीनवहन्तीति। तृतीया तु तदतिरिक्तकरणत्वरूपकारकवाचिनीति अङ्गत्वे श्रुतिः; यथा, व्रीहिभिर्यजेतेति। न च विद्याया अङ्गत्वमिहेष्टम्। अतः

श्रूयते। 'विद्यया हैवैते एवंविदश्चिता भवन्ति' इति वाक्यगता विद्ययेति तृतीया श्रुतित्वेन विवक्षिता। ननु तृतीयायाः शेषत्वश्रुतित्वेऽपि न शेषित्वश्रुतित्वम्। अतो विद्ययेति तृतीयाश्रुत्या न विद्यामयक्रतोः शेषित्वं प्रतिपाद्यं तुं शक्यत इति चेत्— तर्हि, ते हैते विद्याचित एव। विद्यया हैवैते एवंविदश्चिता भवन्ति' इति वाक्यद्वयगत एवकारः श्रुतित्वेन विवक्षितोऽस्तु। तत्र एवकारश्रुत्या [illegible] क्रियामय क्रतुशेषत्वे व्युदस्ते विद्यामयक्रतुशेषत्वमर्थात् सिध्यति तथा, 'त नू'

करणत्वरूपमर्थमुपेक्ष्य प्रयोजनतया हेतुत्वविवक्षया हेतौ तृतीयेयम्। स चार्थो लाक्षणिको न करणत्ववत् मुख्य इति न तस्य श्रुत्योक्तत्वमिति भावः। इत्थम्भूतलक्षणतृतीयापक्षेऽप्येवं श्रुतित्वाभाव एव।

अर्थात् सिद्ध्यतीति। ननु एवकारसमभिव्याहृतेन पदेन यत्र यत्संबन्धो यो बोध्यते, तत्र तदन्यतादृशसंबन्धनिषेध एवकारेण क्रियते। यथा भूतल एव घट इत्यत्र घटस्य भूतलवृत्तित्वे बोध्यमाने तदन्यवृत्तित्वनिषेधः तदेवकारेण। एवञ्चेह यदि विद्याशेषत्वमग्नीनां न बोध्यते, एवकारेण तदन्यक्रियामयक्रतुशेषत्वं न निषिध्येत। यदि च तदर्थं साक्षात् तद् बोध्यते, तर्हि अर्थात् सिद्धिरिति कथमुच्यत इति चेत्—उच्यते। विद्याचित एवेत्यत्र विद्याचिच्छब्दः विद्याङ्गत्वमेषां न स्पष्टमाह। तदर्थश्च संदिग्धः। एवकारस्य पूर्वोक्तरीत्या कश्चिदर्थो निश्चितः। तत्र विद्याचित्पदस्य यादृशार्थस्वीकारे एवकारस्यार्थो न स्यात्, तादृशोऽर्थः स्वीकार्य इति परिशील्य एवकारेण विद्येतराङ्गत्वनिषेधे क्रियमाणे तस्य सार्थक्यमित्यवधार्य विद्याचित्पदेन विद्याशेषत्वावोधने एवकारेण तदर्थोक्त्यसंभवात् पूर्वोक्तरीत्या एवकारार्थसिद्ध्यर्थमेव विद्याचित्पदं तदर्थकतया पश्चादवधार्यते। अतोऽर्थात् सिद्ध्यतीत्युक्तम्। 'सिद्ध्यतु नाम तथैव। अथापि

हैतानेवंविदे सर्वाणि भूतानि' इति सर्वभूतसंकल्प्यापिचयनस्य मनसा संपाद्यस्य परिमितकर्तृकक्रियामयक्रत्वनुप्रवेशासंभवात् सामर्थ्यलक्षण-लिङ्गविरोधेन क्रियामयक्रत्वनुप्रवेशो व्युदस्ते विद्यामयक्रतुशेषत्वं सिद्ध्यति। तथा, 'एवंविदे सर्वाणि भूतानि चिन्वन्ति' इति विद्यासमभिव्याहाररूप-वाक्यवशादपि विद्यामयक्रतुशेषत्वसिद्धिः । ननु एवंविदे इति चतुर्थी-श्रुत्यैव विद्यायाः शेषित्वावगमात् समभिव्याहारलक्षणवाक्यस्य विद्यामय-क्रतुशेषत्वबोधकत्वं कुतोऽभ्युपेयमिति चेत्, एवंविदे इति चतुर्थी-श्रुत्या विद्यावतः शेषित्वबोधनेऽपि विद्यायाः शेषित्वाबोधनेन वाक्येनैव विद्यामयक्रतोः शेषत्वस्य बोधनीयत्वात् ।

ननु विद्यामयक्रतौ विध्यनुपलम्भात् कथं तच्छेषत्वमित्यत्राह, "अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्" । यज्ञानुबन्धि-ग्रहस्तोत्रशस्त्रादीनाम्, 'मनसाऽस्तुवत मनसाऽशंसन्' इत्यादिना आम्नातत्वात् तेषाञ्च क्रत्वव्यभिचारित्वात्, क्रियामयस्य च क्रतोरसंभव-स्योक्तत्वात् विद्यामयक्रतुर्विधित्सितीयते यथा 'स यदि सोमं बिभक्ष

विद्याचित्पदमेव श्रुतिरस्तु' इति चेन्न—विवक्षितस्यार्थस्य लक्षणयैव लभ्यतया तत्र तस्य श्रुतित्वं सम्भवात्। एवकार एव तु श्रुतिः । अन्य-सम्बन्धनिषेधरूपमुख्यार्थकत्वात्। अत सूत्रे श्रुतिपदमेवकारपरमिति।

क्रतोरसम्भवस्येति । क्रतोरेतद्बह्वित्वासम्भवस्येत्यर्थः । यथेत्यादि। न सोममिति इत्यन्त एतद् वाक्यं समाप्तम्। उपरि अत्रेत्यादि तदुप-पादकवाक्यान्तरम्। 'स्तिभिनी फलानि'। 'तद् यदेतत् सोमं क्रीणीयात्, तदेतानि फलानि क्रीणीयात्' इति बह्वृचब्राह्मणात्" इति सोमप्रतिनिधौ। अत एव स्तिभिनीचमसस्य फलचमस इति सोम-नामेति द्रष्टव्यम्। दृष्टत्वादिति। अयं भावः—राजन्यवैश्ययोर्यज्ञे

पिषेत् न्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत्, न सोमम्' इति। अत्र यागार्थद्रव्यसंस्कारभक्षणसंगत्या स्तिभिनीचमसेषु (नीषु?) यागान्वयकल्पनस्य दृष्टत्वात्। अनुबन्धादीति आदिशब्देन श्रुत्यादयः पूर्वोक्ता गृह्यन्ते। प्रज्ञान्तरपृथक्त्ववत्। यथा प्रज्ञान्तरं दहरविद्यादिकं क्रियामयात् क्रतोः पृथग्भूतं श्रुत्यादिभिरवगम्यते, एवमनुबन्धादिभिर्विद्यामयः क्रतुः कल्प्यत इत्यर्थः। दृष्टश्चानुवादसरूपेषु कल्प्यमानो विधिः। तदुक्तम्, 'वचनानि त्वपूर्वत्वात्' इति।

सोमयागे राज्ञे वैश्याय वा यजमानाय न सोमं भक्ष्यत्वेन दद्यात्; किंतु दधिमिश्रन्यग्रोधफलरसम्। सोमवत् फलान्यपि आनाय्य *संपिष्य दध्ना संमेल्य तं संपादयेदिति प्रकृतवाक्ये श्रूयते।* किमत्र यागं सोमेन कारयित्वा यजमानाय फलरसो भक्षणाय परमुपयोक्तव्यः, किं वा अनेन यागोऽपि कार्य इति मीमांसितं तृतीयपञ्चमे, 'फलचमस' इत्यादिभिः सूत्रैः (४७-५१)। सिद्धान्तितश्चैवम्—'न सोमम्' इति सोमरसभक्षणस्य बाधनात् तस्य च यागोपयुक्तद्रव्यसंस्कारकतया प्रतिपत्तिकर्मत्वात् फलरसभक्षणस्यापि प्रतिपत्तिकर्मत्वप्रतीत्या, यागोपयोगाभावे च प्रतिपत्तित्वासिद्धेः एतत्साध्ययागविधिरुन्नीयत इति। अतो यजमानसंबन्धिचमसे गृहीतः फलरसः सोमयागाङ्गत्वेन विधीयते विधिकल्पनया सोमबाधेन; सोमद्रव्यकस्य फलद्रव्यकत्वायोगात्। तद्वदिहापि मानसग्रहस्तोत्रशस्त्रादेः क्रियामयक्रतुनिवेशानर्हस्य विद्यामयक्रत्वङ्गत्वस्य पर्यवसितव्यतया विधिकल्पनेति। अत्रायं विशेषः—तत्र स्थित एव सोमयागे सोमबाधेन फलद्रव्यविनियोगविधिमात्रम्, इह तु विद्यामयक्रतूत्पत्तिविधिरपीति। एवमप्यविशिष्टा विधिकल्पनोभयत्र।

फलचमसस्थलमिदं विधिकल्पनोदाहरणतया वैशद्यार्थमुक्तम्।

ननु, 'तेषामेकैक एव तावान् यावानसौ पूर्वः' इत्यतिदेशेन मकृतेष्टकचितामितुल्यत्वावगमात् कियामयक्रत्वनुप्रवेशोऽवगम्यत इति चेत्—तत्राह, "न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्ति"। न ह्यतिदेशबलात् सर्वथा साम्यं वक्तव्यम्; येन कियामयक्रत्वनुप्रवेशः स्यात्। स्वशेषिभूतक्रतुद्वारा फलजनकत्वरूपविवक्षितसामान्यमात्रेणाप्यतिदेश उपपद्यते। 'स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषः' इत्यत्र संहर्तृत्वसामान्यविवक्षयाऽपि मृत्युशब्दः प्रयुक्तः। न तु सर्वथा साम्यं विवक्षित्वा। तथात्वे मृत्युवत् मण्डलपुरुषस्यापि मृत्युलोकप्राप्तिः स्यात्। अतो विवक्षितसाधर्म्यमात्रेणापि, 'तेषामेकैक एव तावान्' इत्यतिदेशः उपपद्यते।

"परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्ध"। परेण च ब्राह्मणेन अस्यापि मनश्चिदाद्यभिधायिन शब्दस्य ताद्विध्यं = तद्विधत्वं = विद्यामयप्रतिपादकत्वमवगम्यते। परस्मिन् हि ब्राह्मणे, 'अयं वाव लोक एषोऽग्निश्चितः। तस्याऽऽप एव परिश्रितो मनुष्या यजुष्मत्य इष्टकाः' इत्यारभ्य, 'सर्वोऽग्निर्लोकम्पृणामभिसंपद्यते। स यो हैतदेवं वेद लोकम्पृणाम् एनं भूतमेतत् सर्वमभिसंपद्यते' इति सर्वभूताभिसंपत्तिफलायाः

न त्विह सूत्रे तद्विवक्षा। तत्र फलत्वमस्यागसंबन्धस्येत्यत्र विद्यामयक्रतुतत्संबन्धयोरत्यन्ताश्रुतत्वाभावात्। 'यत् किञ्च यज्ञे कर्म क्रियते यत् किञ्च यज्ञियं कर्म ..मनोमयमक्रियत' इति श्रवणात्। विधिः परं न श्रूयते। अतः ईदृशास्थलान्तराभिप्रायेण दृष्टश्चेति सूत्रखण्डं व्याख्याति दृष्टश्चेत्यादिना।

मण्डलपुरुषस्यापीति। विषयोऽयं पूर्वब्राह्मणस्थितः।

१०. ५. ६.

[वैश्वानरविद्या]

अथ हैतेऽरुणे औपवेशौ समाजग्मुः सत्ययज्ञः पौलुषिर्महाशालो जाबालो बुडिल आश्वतराश्विरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यः। ते ह वैश्वानरे समासत। तेषां ह वैश्वानरे न समियाय॥१

ते होचुः—अश्वपतिर्वा अयं कैकेयः सम्प्रति वैश्वानरं वेद ; तं

क्रियामयक्रत्वनङ्गभूताया विद्यायाः प्रतिपादनदर्शनेन मनश्चिदादीनां सापादिकाग्नीनां न क्रियामयक्रत्वनुप्रवेशित्वम्। ननु मनश्चिदादीनां क्रियानुबन्धाभावे अग्निरहस्ये कर्मकाण्डेऽनुबन्ध किमर्थमित्यत्राह— भूयस्त्वात्त्वनुबन्ध। मनश्चिदादिषु संपादनीयानामग्न्यङ्गानां भूयस्त्वात् तत्सन्निधानिहानुबन्धः कृत इति स्थितम् ॥

इति अग्निब्राह्मणप्रकाशिका।

वैश्वानरविद्या प्रस्तूयते **अथ...समियाय**। पुलुषपुत सत्ययज्ञनामा, महागृहस्थो जबालासुतः, अश्वतराश्वसुतो बुडिलनामा, भाल्लविसुत इन्द्रद्युम्ननामा, शार्कराक्षसुतो जननामा **एते** पञ्चापि महर्षय उपवेश(शि ?) सुतस्यारुणस्य समीपमागता। ते सर्वेऽपि महर्षय **वैश्वानरे** विश्वेषां नराणां नेतरि परमात्मनि **समासत** एकीभूय विचारं कृतवन्तः। तेषाञ्च वैश्वानरविषये बुद्धिर्न **समियाय** न सङ्गताऽभूत् = ऐक्यं न गता। परस्परं विवदमाना एव स्थिता इत्यर्थः ॥ १ ॥

उपवेशसुतस्येति। बृहदारण्यकान्ते (८-५) अरुणः उपवेशिशिष्यत्वेनोक्तः, 'उद्दालकोऽरुणात्, अरुण उपवेशेः, उपवेशिः कुश्रेः' इति। ते इति अरुणप्रभृतिसर्वग्रहणम्। सत्ययज्ञादयः पञ्च महर्षयः

गच्छामेति । ते हाश्वपतिं कैकेयमाजग्मुः । तेभ्यो ह पृथगावसथान्

ते....प्रोवाच । केकयसुत. अश्वपति. अधुना वैश्वानरमुपास्ते, तमभ्यागच्छामेत्युक्त्वा तमाजग्मु. । तेभ्य प्राप्तेभ्य प्रत्येकं गृहान्

छान्दोग्येऽपि निर्दिष्टाः । परन्तु महाशालजाबालस्थाने तत्र प्राचीनशाल औपमन्यवः । तत्र प्राचीनशाल इति क्वापि नामेति अन्यप्रायन्यायानुसारेण भाव्यम् । इह महाशालपदं महागृहस्थार्थक-मुक्तम् । महाशालपदमिदं तत्र, 'ते हैते महाशाला महाश्रोत्रियाः' इति सर्वेषां विशेषणतया प्रयुक्तत्वात् यौगिकमवसीयते; जाबालोऽय-मप्यौपमन्यव एवेति अत्रोपरि औपमन्यवेति संबोधनादेव ज्ञायते । तदयञ्च प्राचीनशालश्चैक इति युक्तम् । परन्त्वयं जाबालः छान्दोग्य-सत्यकामविद्यादिप्रसिद्धो जाबालश्च यद्येकः, तर्हि सत्यकामस्य तस्य उपमन्युः पितेति इतो विज्ञेयम् । अन्योऽप्ययं भवितुमर्हति । सर्वथा महर्षयः पञ्चेमे एव छान्दोग्येऽपि निर्दिष्टा इति सुवचम् । एवमश्व-पतिः कैकेयोऽप्युभयत्र समानः । तत्रोद्दालक आरुणिः गौतम उक्तः; अत्र तस्य पिता अरुण औपवेशिर्गौतम उक्त इति भेदः प्रतीयते ।

एवं तत्तदुपास्यांशवर्णनेऽपि वैलक्षण्यं लक्ष्यते—तत्र मूर्धो-पासक औपमन्यवः, इह तु जनः शार्कराक्ष्यः; तत्र चक्षुरुपासकः सत्ययज्ञः, इहेन्द्रद्युम्नः, तत्र प्राणोपासक इन्द्रद्युम्नः इह बुडिलः; तत्र मध्यकायोपासको जनः, इह जाबालः; तत्र वस्त्युपासको बुडिलः, इह सत्ययज्ञ इति। गौतमस्तूभयत्र पादोपासक एव। एवमु-पपादनवैषम्येऽपि तत्तदुपास्याकाराणां सर्वेषां मेलनं वैश्वानरविद्या-यामित्येतदुभयत्राविशिष्टम् । अन्याशास्यार्थवादमात्रत्वात् तद्वैषम्यं नोपास्याकारभेदमावक्ष्यति । कथावैषम्यशङ्का तु कल्पभेदव्यवस्थया वा विभिन्नवैश्वानरोपासकत्ववर्णनमात्रतात्पर्येण वा परिहार्या ।

यत्तु किञ्चित् उपास्यांशेऽपि वैलक्षण्यं प्रतीयमानम्, यथा तत्र दिव उक्तं सुतेजस्त्वमिह आदित्यस्योक्तं विश्वरूपत्वस्थाने, दिवस्तु

पृथगपचितीः पृथक्साहस्रान्त्सोमान् प्रोवाच । ते ह प्रातरसंविदाना एव समित्पाणयः प्रतिचक्रमिरे, उप त्वा यामेति ॥ २ ॥

स होवाच—यन्नु भगवन्तोऽनूचाना अनूचानपुत्राः, किमिदमिति । ते होचुर्वैश्वानरँ ह भगवान्त्सम्प्रति वेद । तं नो ब्रूहीति ।

प्रत्येकं पूजाश्च कृत्वा, 'सहस्रदक्षिणैः सोमैर्यक्ष्ये । युष्मभ्यं च बहु धनं दास्यामि । तावन्तं कालमुषित्वा अनुगृह्णन्तु' इति प्रार्थयामास । ते... त्वा यामेति । ते षडपि महर्षयः अपरेद्युः प्रातःकाले त्वरया परस्परमसंमन्त्र्यैव समिद्भारहस्ताः, 'त्वां शिष्यास्सन्तः उपगच्छाम' इति प्राप्ताः ॥

स....किमिदमितीति । हे पूज्याः भगवन्तः ! श्रुताध्ययनसंपन्नाः तादृशकुलप्रसूताश्च भवथ । भवतां किमविदितम् ? यदिदं समिद्भारहस्ततया मदुपसर्पणम् , तत् किं कस्य हेतोः ? ते होचुः....

अतिष्ठात्वमिति किञ्चिदिति,—तत्र शब्दभेदेऽपि अनुसंधेयोऽर्थ एकरूप एवेति श्रुतप्रकाशिकायामेव समाहितमस्ति । प्रादेशमात्रत्वं परम् एकतामापादयितुमशक्यं मियमानं विद्यायां विकल्पेन निविशते इति परिशीलनीयम् । छान्दोग्ये निरूपणसरणौ मूर्धादिपादान्तक्रम आदृतः, इह तु पादादिमूर्धान्तक्रम इत्यपि किञ्चित् । प्राणाहुत्याद्यङ्गविस्तरश्छान्दोग्ये विशिष्यते । फलभेदशङ्काऽप्येवं परिहार्येत्यलम् ।

अनुगृह्णन्तु इति प्रार्थयामासेत्यनेन एषां प्रतिग्रहे अत्यन्तनैःस्पृह्यं द्योतितम् । अत एव हि असद्द्रव्यबुद्ध्या प्रतिग्रहमुपेक्षेरन्निति शङ्कया राज्ञा तत्परिहारः कृतः ; यदिदम्—

'न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।
नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः ॥'

... दर्शितं छान्दोग्योपनिषदा ।

स होवाच—सम्प्रति खलु त्वा (वा ?) अहं वैश्वानरं वेद। अभ्याधत्त समिध. उपेताः स्थेति ॥ ३ ॥

स होवाचारुणमौपवेशिम् । गौतम! क त्वं वैश्वानरं वेत्थेति पृथिवीमेव राजन्निति होवाच। ओमिति होवाच। एष वै प्रतिष्ठा वैश्वानर.। एत हि वै त्वं प्रतिष्ठा वैश्वानर वेत्थ। तस्मात् त्वं प्रतिष्ठितः प्रजया पशुभिरसि। यो वा एत प्रतिष्ठा वेश्वानर वेद, अप

ब्रूहीति। स्पष्टोर्थः। स स्थेति। स चाश्वपतिर्ब्राह्मणाना अब्राह्मणेरुपनयनम् अनुचितमिति मत्वा, हे महर्षय! अहं वैश्वानरं जान एव। उपेताः स्थ। यूय पूर्वमेव स्वाचार्यैः कृतोपनयना एव। अथवा उपत्वा यामीत्युक्त्यैव यूयमुपेतप्राया एव = शिष्य वेनोपागतप्राया एव। आनीताश्च समिध स्वस्याग्निषु प्रक्षिपत। केवल मैत्र्यैवोपदेक्ष्यामीति [उवाचेति ?] भाव ॥ ३ ॥

वैश्वानरे विवदमानान् तान् आलोच्य ज्ञाताज्ञातांशबुभुत्सया तान् प्रत्येक प्रष्टुमुपक्रमते स होवाच वेत्थेति। गौतमगोत्रत्वात गौतमेति सबोधनम्। इतर आह पृथिवीमेव राजन्निति होवाच। पृथिवीशरीरकात्मानमुपासे इत्युवाचेत्यर्थ। अङ्गीकरोति ओमिति। उपदेष्टव्यांशमुपदिशति एष वै प्रतिष्ठा—। त्वया उपास्यमानपृथिवीशरीरकवैश्वानरात्मा प्रतिष्ठा। पृथिव्या सर्वभूताधारत्वात् प्रतिष्ठात्वम्। ततश्च सर्वभूताधारत्वलक्षणगुणयोगनिमित्तप्रतिष्ठासंज्ञोऽयं त्वदुपास्यमान पृथिवीशरीरको वैश्वानरात्मेत्यर्थ। एत हि सर्वमायुरेति। स्पष्टोऽर्थ। एव फलप्रदर्शनेन प्रलोभ्य तस्य वैश्वानरात्मपादतया वैश्वान

भाव इति। उपनयनमकृत्वैवोपदेश इत्यर्थे एव छान्दोग्यैकरस्यम्।

पुनर्मृत्युं जयति ; सर्वमायुरेति । पादौ त्वेतौ वैश्वानरस्य । पादौ ते ग्लास्येताम् ,(पादौ तेऽविदितावभविष्यताम्)यदि ह नागमिष्य इति॥

अथ होवाच सत्ययज्ञं पौलुषिम् , प्राचीनयोग्य! कं त्वं वैश्वानरं वेत्थेति । अप एव राजन्निति होवाच, एष वै रयिर्वैश्वानरः । एतँ हि वै त्वं रयिं वैश्वानरं वेत्थ । तस्मात् त्वं रयिमान् पुष्टिमानसि । यो वा एतँ रयिं वैश्वानरं वेद, अप पुनर्मृत्युं जयति ; सर्वमायुरेति । वस्ति(?)त्वा एष वैश्वानरस्य । वस्ति त्वाहास्यत् , यदि ह नागमिष्य इति । (वस्तिस्तेऽविदितोऽभविष्यत् । यदि ह नागमिष्य इति वा ॥)

अथ होवाच महाशालं जाबालम्—औपमन्यव! कं त्वं वैश्वानरं वेत्थेति । आकाशमेव राजन्निति होवाच । ओमिति होवाच, एष वै बहुलो वैश्वानरः । एतं हि वै त्वं बहुलं वैश्वानरं वेत्थ । तस्मात् त्वं बहुः प्रजया पशुभिरसि । यो वा एतं बहुलं वैश्वानरं वेद, अप पुनर्मृत्युं जयति ; सर्वमायुरेति । आत्मा त्वा एष

रात्मत्वपर्याप्त्यधिकरणं (णत्वं) न भवति । अतो मत्समीपमागत्य अस्य श्रोतव्यस्यार्थस्याश्रवणे तव पादौ ग्लानौ भविष्यत इत्याह पादौ.... इति । एवमुत्तरत्रापि । पादावविदितावभविष्यतां यदि नाग- मिष्य इति पाठे अविदितौ अज्ञातौ = नष्टावित्यर्थः ॥ ४ ॥

अथ होवाच सत्ययज्ञं... । प्राचीनयोग्येति सत्यज्ञस्य नामान्तरम् । रयिः धनम् । वस्तिः मूत्रस्थानम् । अहास्यत् अत्यक्ष्यत् । 'ओ हाङ्त्यागे' । शिष्टं स्पष्टम् ॥ ५ ॥

अथ होवाच महाशालं... । भूतान्तरापेक्षया आकाशस्य विपुलत्वात् बहुलत्वम् । आत्मा मध्यकाय इत्यर्थः । छान्दोग्ये समान- प्रकरणे मध्यकायवाचिसंदेहशब्दश्रवणात् । शिष्टं स्पष्टम् ॥ ६ ॥

वस्ति वेत्यत्र वस्तिस्त्वा इतिस्यात्। अत्रसर्वत्रत्वा इत्यत वा इत्येवस्यात्।

वैश्वानरस्य । आत्मा त्वाहास्यत्, यदि ह नागमिष्य इति (आत्मा तेऽविदितोऽभविष्यत्, यदि ह नागमिष्य इति वा) ॥ ६ ॥

अथ होवाच बुडिलमाश्वतराश्विम्—वैयाघ्रपद्य! कं त्वं वैश्वानरं वेत्थेति । वायुमेव राजन्निति होवाच । ओमिति होवाच, एष वै पृथग्वर्त्मा वैश्वानरः, एतं हि वै पृथग्वर्त्मानं वैश्वानरं वेत्थ । तस्मात् त्वां पृथग्रथश्रेणयोऽनुयान्ति । यो वा एतं पृथग्वर्त्मानं वैश्वानरं वेद, अप पुनर्मृत्युं जयति, सर्वमायुरेति । प्राणस्त्वा एष वैश्वानरस्य । प्राणस्त्वाहास्यत्, यदि ह नागमिष्य इति । (प्राणस्तेऽविदितोऽभविष्यत्, यदि ह नागमिष्य इति वा) ॥ ७ ॥

अथ होवाचेन्द्रद्युम्नं भाल्लवेयम्—वैयाघ्रपद्य! कं त्वं वैश्वानरं वेत्थेति । आदित्यमेव राजन्निति होवाच । ओमिति होवाच, एष वै सुततेजा (सुतेजाः) वैश्वानरः। एतं हि त्वं सुततेजसं वैश्वानरं वेत्थ । तस्मात्तवैव सुतोऽयमानः पच्यमानोऽक्षीयमाणो गृहेषु तिष्ठति । यो वा एतं सुततेजसं वैश्वानरं वेद, अप पुनर्मृत्युं जयति, सर्वमायुरेति । चक्षुस्त्वा एतद्वैश्वानरस्य । चक्षुस्त्वाहास्यत्, यदि ह नागमिष्य.। (चक्षुस्तेऽविदितमभविष्यत्, यदि ह नागमिष्य इति वा) ॥८॥

अथ होवाच बुडिल....। वायोर्वियद्गति(र्विविधगतिः)मत्त्वात् पृथग्वर्त्मत्वम् । त्वां पृथग्रथश्रेणयोऽनुयान्ति । रथपङ्क्तयो नानादेशस्थाः त्वामनुयान्तीत्यर्थः । शिष्टं स्पष्टम् ॥ ७ ॥

अथ होवाचेन्द्रद्युम्न.। शोभनं तेज यस्य स सुतेजाः । सुततेजा इति पाठेऽपि स एवार्थः । अभिषुत एष सोम अयमानः पीयमानः पच्यमानः अभिषु हूयमान। अक्षीयमाणः गृहेषु तिष्ठति । तस्य गृहे सर्वदा सोमयागा अनुवर्तमाना भवन्तीत्यर्थः ॥ ८ ॥

अथ होवाच जनं शार्कराक्ष्यम्—सायवस! कं त्वं वैश्वानरं वेत्थेति। दिवमेव राजन्निति होवाच। ओमिति होवाच, एष वा अतिष्ठा वैश्वानरः। एतं हि वै त्वमतिष्ठां वैश्वानरं वेत्थ। तस्मात् त्वं समानान् अति तिष्ठसि। यो वा एतमतिष्ठां वैश्वानरं वेद, अप पुनर्मृत्युं जयति; सर्वमायुरेति। मूर्धा त्वा एष वैश्वानरस्य। मूर्धा त्वाहास्यत्, यदि ह नागमिष्य इति। (मूर्धा तेऽविदितोऽभविष्यत्, यदि ह नागमिष्य इति वा)॥ ९॥

तान् होवाच। एते वै यूयं पृथग्वैश्वानरान् विद्वाँसः पृथगन्नमघस्त। प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसम्पन्नाः। तथा तु व एनान् वक्ष्यामि, यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामीति॥१०

अथ होवाच जनं...। अतीत्य तिष्ठतीत्यतिष्ठाः। दिवः सर्वलोकान् अतीत्य स्थितत्वात् अतिष्ठात्वम् ॥ ९ ॥

तान् होवाच...। एतादृशा यूयं वैश्वानरान् पृथक्पृथक् उपासीनाः पृथगेव अन्नं भोग्यजातमनुभवथ। न तु सर्वलोकसर्वभूतसर्वात्मस्वब्रह्मरूपान्नानुभवो वोऽस्तीति भावः। प्रादेशमात्रमिव.... संपन्नाः। देवाः सूर्यादयः यदा उपासनया प्रादेशमात्रमभिसंपन्नाः प्राप्ता इव भवन्ति, तदा ते विदिता भवन्ति।

द्युमूर्धपृथिव्यादिपरिच्छिन्नस्य कथं प्रादेशमात्रत्वाभिसंपत्तिः ? तत्राह तथा तु वः....संपादयिष्यामीति। यथा द्युप्रभृतयः प्रादेशमात्रत्वमभिसंपद्यन्ते, तथा वक्ष्यामीत्यर्थः ॥ १० ॥

प्रादेशमात्रत्वप्रकारविशेषयोरिति। एतदुपपादनक्रमः छान्दोग्यभाष्यपरिष्कारयोर्द्रष्टव्यः। नन्वत्र वैश्वानरविद्यायाम्, 'अप पुनर्मृत्युं जयति, सर्वमायुरेति' इति आयुष्कालमध्ये मरणं विना पूर्णायुः-

स होवाच मूर्धानमुपदिशन्, 'एष वा अतिष्ठा वैश्वानर इति; चक्षुषी उपदिशन्नुवाच, एष वै सुतेजा वैश्वानर इति, नासिके उपदिशन्नुवाच, एष वै पृथग्वर्त्मा वैश्वानर इति, मुख्यमाकाशमुपदिशन्नुवाच, एष वै बहुलो वैश्वानर इति, मुख्या अप उपदिशन्नुवाच, एष वै रयिर्वैश्वानर इति, चुबुकमुपदिशन्नुवाच, एष वै प्रतिष्ठा

स ह . . । मूर्धानम् उपदिशन्=कराग्रेण दर्शयन् उवाच । एष वै. . . । प्रसिद्धे उपासकमूर्धनि अतिष्ठासंज्ञकवैश्वानरमूर्धभूतद्युलोकदृष्टिः कर्तव्येत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् । मुख्यमाकाशं. . . । मुख्याकाशः आस्यान्तर्गताकाशः । मुख्या अप । अत्रापि मुख्यशब्दस्य पूर्ववदर्थः । चुबुकमुपदिशन् । अधराधोवयवविशेषः चुबुकशब्देनोच्यते । ततश्च प्रादेशपरिमिते मूर्धचुबुकान्तराळे त्रैलोक्यशरीरकस्य वैश्वानरस्याऽऽत्मनः संपादितत्वात् प्रादेशमात्रत्वम् । यथा

प्राप्तिरूपफलश्रवणात्, छान्दोग्ये तु 'को न आत्मा किं ब्रह्म' इत्युपक्रमानुसारेण ब्रह्मविद्यात्वावगमात् ब्रह्मप्राप्तिरूपफलाङ्गीकाराच्चोभयोर्भेदात् प्रादेशमात्रत्वं तत्र तत्र व्यवस्थितमिति कथनसंभवात् कथं वैकल्पिकत्ववाद इति चेन्न—उपाख्यानशैलीसाम्यात् विश्वलोकशरीरत्वोपासनविधानाच्चैक्यस्य प्रतीयमानतया फलैक्यस्यापि स्वीकारात्। अप पुनर्मृत्यु जयतीति मृत्योरपजयो हि मोक्ष एव भवितुमर्हति । यथा नाचिकेतब्राह्मणोक्तो मृत्योरपजयो मोक्षः। 'सर्वमायुरेति' इत्येतत्तु मोक्षोपयोगिविद्यानिष्पत्त्यपेक्षितमायुरानुषङ्गिकं दर्शयेत् । यथा छान्दोग्ये प्राणाग्निहोत्रप्रस्तावे, 'तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेन' इति । अत एव सर्ववेदान्तप्रत्ययाधिकरणे श्रीभाष्यम्— "फलसंयोगोऽप्युभयत्रापि ब्रह्मप्राप्तिरूपोऽविशिष्टः" इति ।

वैश्वानर इति। स एषोऽग्निर्वैश्वानरो यत् पुरुषः।

स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं

एकस्मिन्नग्नीषोमीययागे शाखाभेदेन विहितयोः एकादशद्वादशकपालत्वयोः विकल्पेन अनुष्ठानम्; न तु यागभेद, एवमेकस्यां वैश्वानरविद्यायां छान्दोग्यवाजसनेयकशाखाम्नातप्रादेशमात्रत्वप्रकारविशेषयोः विकल्पेनानुष्ठानम्। नैतावता विद्याभेदः शङ्कनीयः।

स एषोऽग्निर्वैश्वानरो यत् पुरुषः। यच्छब्दः प्रसिद्धिपरः। 'सहस्रशीर्षा पुरुष' इत्यादिवेदान्तवाक्येषु प्रसिद्धो यः पुरुषः, स एष वैश्वानरोऽग्निः। अत्र अग्निशब्दः अपर्यवसानवृत्त्याऽग्निशरीरकपरमात्मपरः।

स यो....एति। द्युप्रभृतिमूर्धादिमत्त्वात् पुरुषविधत्वम्।

अग्निशब्दोऽपर्यवसानवृत्त्येति। ननु किमत्र विनिगमकम्? अग्निशब्द एव, 'साक्षादप्यविरोधं जैमिनिः' इति दर्शिताग्निनयनार्थकोऽस्तु, वैश्वानरपदञ्चापर्यवसानवृत्त्या परमात्मपरम्। अस्तु वा अग्निपदोक्ते विशिष्टेऽर्थे विशेषणमात्रान्वयि जाठराग्नित्वरूपं वैश्वानरत्वं विशेषभूतम्। पदद्वयमपि वा यौगिकमेव भवतु—इति चेन्न—वैश्वानरपदस्य विद्याप्रक्रमप्रभृतिश्रूयमाणतया, तत्र द्युपृथिव्यादिशरीरकतया, दीपोक्तरीत्या ब्रह्मपदस्थानःपन्नतया च जाठराग्निग्रहणासंभवे स्थिते तदा जाठराग्निग्रहणस्यावश्यकत्वान्नगमेन च बाधकबलात् अनन्यथासिद्धाग्निलिङ्गाभावाच्चोपक्रमे वैश्वानरपदं योगिकमित्यवधारणात्। अग्निपदमप्यत्र श्रूयमाणं यौगिकं भवत्विति तु न शङ्क्यम्, अन्तः प्रतिष्ठितत्वरूपलिङ्गस्यात, प्राणाहुत्याधारत्वरूपस्य च लिङ्गस्य छान्दोग्ये प्रतीयमानतया लोकप्रसिद्धस्योदर्याग्नेरपि ग्राह्यत्वादिति।

वेद, अप पुनर्मृत्युं जयति, सर्वमायुरेति ; न हास्य ब्रुवाणश्चन वैश्वानरो हिनस्ति ॥ ११ ॥

पुरुषेऽन्तः प्रतिष्ठितत्वञ्च पुरुषान्तःप्रतिष्ठितजाठराग्निशरीरके परमात्मन्युपपद्यते । सूत्रितञ्च, "शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते" इति । अत्र च वक्तव्यं **छान्दोग्योपनिषत्प्रकाशिकायामुक्तम्**, तत्रैवानुसन्धेयम् ।

न हास्य ब्रुवाणश्चन वैश्वानरो हिनस्ति । वैश्वानरविद्यानिष्ठत्वाभावेऽपि वैश्वानरविद्याप्रतिपादकोपनिषत्पाठकमपि तत्प्रतिपाद्यः परमात्मा संसाराम्बुधौ न पातयतीत्यर्थः ॥ ११ ॥

क्षेमाय यः करुणया क्षितिनिर्जराणां भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

इति श्रीमद्वातूलाचार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्यपादसेवासमधिगतशारीरकमीमांसाभाष्यहृदयस्य परकालमुनिपादसेवासमधिगतपारमहंस्यस्य

श्रीरङ्गरामानुजमुनेः कृतिषु

अग्निरहस्यप्रकाशिका ॥

शुभमस्तु ॥

छान्दोग्योपनिषत्प्रकाशिकायामिति । वैश्वानराधिकरणसूत्राणां प्रायश्छान्दोग्यवाक्यग्रहणेन प्रवृत्तत्वात् तत्रैव तदधिकरणरचना कृता । एवं तृतीयतृतीयगतं भूमज्यायस्त्वाधिकरणमपि तत्रैव रचयित्वा दर्शितमिति ध्येयम् ।

१. १०. ६.

[शाण्डिल्यविद्या]

सत्यं ब्रह्मेत्युपासीत। अथ खलु क्रतुमयोऽयं पुरुषः। स यावत्क्रतुरयम् अस्माल्लोकात् प्रैति, एवंक्रतुर्हामुं लोकं प्रेत्याभिसंभवति। स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमाकाशात्मानं कामरूपिणं मनोजवसं सत्यसङ्कल्पं सत्यधृतिं सर्वगन्ध

अग्निरहस्यान्तर्गतस्य शाण्डिल्यविद्याभागस्य शारीरके तृतीयतृतीये *समानाधिकरणे विचारितत्वात् स भागोऽपि भाष्यभावेऽपि* व्याख्याय प्रकाश्यते। तदधिकरण(   )रचनाप्रकारो बृहदारण्यको(७-६-१.)पनिषद्भाष्यपरिष्कारयोर्द्रष्टव्यः। एतच्छाण्डिल्यविद्यावाक्यार्थवर्णनविवरणादिकमपि छान्दोग्यो(३-१४.)पनिषद्भाष्यपरिष्कारयोर्यथावद् द्रष्टुमुचितम्। अतो नात्र प्रतन्यते। सत्यमित्यस्य निर्विकारमिति प्रसिद्धोऽर्थः। तदर्थादरणे ब्रह्मोपासनस्य सत्यत्वज्ञानत्वानन्तत्वानन्दत्वामलत्वरूपस्वरूपनिरूपकधर्मविशिष्टतयैव सर्वत्रोपास्यतायाः आनन्दाद्यधिकरणसिद्धत्वात् नात्र वाक्ये किञ्चिद् विधेयमस्तीति स आत्मानमुपासीतेति वाक्य एव सर्वगुणविशिष्टपरमात्मोपासनमिति नात्र पक्षे क्लेशः। यदा तु सत्यपद छान्दोग्ये; 'सर्वं खल्विदं ब्रह्म' इत्युक्तसमानार्थकत्वसिद्धये, बृहदारण्यके (७-४.), 'तदेतत् त्र्यक्षरं सत्यमिति। स इत्येकमक्षरम्, तीत्येकमक्षरम्, यमित्येकमक्षरम्' इत्यत्रोक्तरीत्या चेतनाचेतनसर्वनियन्तृ इत्यर्थपरमिष्यते, तदा उक्तविधसत्यत्वविशिष्टब्रह्मोपासने प्रथमवाक्येन विहिते, स आत्मानमिति वाक्येन प्राप्तोद्देशेनानेकगुणविधाने वाक्यभेद इति शङ्का प्राप्नोति। तत्र प्रथमवाक्ये उपासनोत्पत्तिविधिः, 'एवंक्रतुर्ह' इति वाक्येऽधिकारविधानम्, 'स आत्मानम्' इति वाक्ये प्रयोगविधानम्। *संभवति च प्रयोगान्वयितयाऽपि गुणानां विधानमिति छान्दोग्ये*

सर्वरसं सर्वा अनु दिश प्रभूत सर्वमिदमभ्यात्तमवाक्यनादरम्, यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वा एवमयमन्तरात्मन् पुरुषो हिरण्मय, यथा ज्योतिरधूमम् एव, ज्यायान् दिवो ज्यायानाकाशात् ज्यायानस्यै पृथिव्यै ज्यायान् सर्वेभ्यो भूतेभ्य । स प्राणस्यात्मा । एष म आत्मा । एतमित आत्मानं प्रेत्याभिसंभविष्यामीति *यस्य स्यादद्धा न विचिकित्साऽस्तीति ह स्माह* शाण्डिल्य । एवमेतदिति ॥ २ ॥

इति अग्निरहस्यम् ॥

(शतपथब्राह्मणे शुक्लयजुर्वेदीये बृहदारण्यकोपनिषद पूर्वं स्थितम् अग्निरहस्यम् । तत्र ब्रह्मसूत्रोपयोगि यावत् तावदत्र मुद्रितम् ।)

श्रीरस्तु

भाष्यानुसारेण परिष्कारे प्रपञ्चितमनुसन्धेयम् । सत्यमित्यारभ्य सर्वं वा, यथाव्रीहिरित्यादिकं वा, एष म आत्मेत्यादिकमेव वा शाण्डिल्यानुसन्धानमस्तु । सर्वथा अप्राप्तं सर्वमुपासनान्वयितया स्वीकार्यं छान्दोग्योक्तसर्वकामत्वादिगुणान्तरवत् इत्यलमधिकेन । अक्षरार्थस्तावत्—क्रतुरुपासनम् । एवंक्रतु = एवंभूतोपासनवान् । उपासनप्रचुरो हि पुरुष । तस्मादुपासनानुगुणफलभाक्त्वात् यत्प्रकारकोपासनमनुष्ठायेमं लोकं विसृजति, अमुत्र लोके तत्प्रकारप्राप्तिमान् भवति । अत परिशुद्धमनोग्राह्य सर्वप्राणधारक भास्वररूपमव्याकृताकाशस्याप्यात्मभूतमिच्छागृहीताभिमतदिव्यमङ्गलविग्रह मनोवेगसपत्नमप्रतिहतसकल्पमधृष्यधारणशक्ति सर्वगन्ध सर्वरस सर्वदिव्यार्पित स्वीकृतसर्वकल्याणगुण ब्रह्मादिस्तम्बपर्यन्तसर्वजगत्तृणीकरणेन जोषमासीनमवाप्तसमस्तकामतया आदर्तव्याभावादादररहितं परमात्मानमुपासीतेति । यथा व्रीहिरित्यादिना अणीयस्त्वमुपासनार्थं कल्पितमुक्तम् । हिरण्मयविग्रहदृष्टान्त उच्यते यथा ज्योतिरधूममिति ।

सामायिकं व्याप्तिमुच्यते उपायानिति । श्रद्धा निश्चयः । यस्य, अहमेवम्भूतं प्राप्स्यामीति दृढोऽध्यवसायः, सोऽवश्यं प्राप्स्यत्येव । न तत्र संशयोऽस्तीति ।

भाष्यार्थो विस्तरो द्रष्टव्यः ; यत एतद्विषयकं सर्वत्रप्रसिद्धमधिकरणं 'समानएवञ्चाभेदात्' इति समानाधिकरणञ्चेति ।

श्रीमद्वेदान्तसौमित्रिलक्ष्मणयोगिनः ।
शिष्येणेदं विनीतेन वात्स्यचक्रवर्तिना ॥
ईशाद्युपनिषद्भाष्यपरिष्कारविधायिना ।
श्रीवीरराघवेणाग्निरहस्यञ्च परिष्कृतम् ॥

इति वात्स्यचक्रवर्तिवीरराघवाचार्यकृतेषु
उपनिषद्भाष्यपरिष्कारे अग्निरहस्यभाष्यपरिष्कारः ।

शुभमस्तु

—.**:—

शारीरके अग्निरहस्य वाक्यस्थलम् — ३-३-४४-५०.
शारीरके वैश्वानरवाक्यस्थलम् — १-२-२५-३३
शारीरके शाण्डिल्यवाक्यस्थलम् — ३-३-१९.

अग्निरहस्यान्तर्गतानि ऋष्यादिनामानि

कुशिर्वाजश्रवसः गौतमः सुश्रवाः कौष्यः	730
अश्वपतिः कैकेयः	738
आरुण औपवेशिः गौतमः	741
सत्ययज्ञः पौलुषिः प्राचीनयोग्यः	742
महाशालो जाबालः औपमन्यवः	,,
बुडिल आश्वतराश्विः वैयाघ्रपद्यः	743
इन्द्रद्युम्नो भाल्लवेयः वैयाघ्रपद्यः	,,
जनः शार्कराक्ष्यः सायवसः	744
शाण्डिल्यः	748

अग्निरहस्यभागार्थसंग्रहकारिकाः

शारीरके शतपथस्य ब्राह्मणाग्निरहस्यगम् ।
समानाधिक्रिया पूर्वविकल्पाधिक्रियाद्वये ॥ १ ॥
वैश्वानराधिक्रियायामपि यस्माद् विचारितम् ।
तस्मात् तदर्थमालस्य संग्रहः क्रियतेऽधुना ॥ २ ॥
सर्वसंहरणान्मृत्युरित्युक्तः पुरुषः परम् ।
आदित्यमण्डलादिस्थमुक्त्वा ध्येय विमुक्तये ॥ ३ ॥
खण्डान्तरे तत्र प्रोक्तः क्रतुर्विद्यामयोऽद्भुतः ।
पुंसां स्वायुर्गतैकैकदिनसंभविषु स्वयम् ॥ ४ ॥
मनोवाक्चक्षुरादीनां व्यापारेषु विभाव्यते ।
यत्र चित्याग्निराधानस्तोत्रशस्त्रग्रहादि च ॥ ५ ॥
अथ चित्याग्निसंबद्धा विद्या काचन दर्शिता ।
वैश्वानरात्मविद्या च छान्दोग्ये विस्तृता हि या ॥ ६ ॥
एतत् सर्वं [illegible] ।
शाण्डिल्यविद्या छान्दोग्यबृहदारण्यकस्थिता ॥ ७ ॥

शुभमस्तु

अग्निरहस्यभागविषयसूची

मृत्युब्रह्मोपासनम्	708
क्रतुन्याय	711
मनोब्रह्मोपदेश	712–722
लोकपृणाविषयाणि उपासनानि	723–729
पूर्वविकल्पाधिकरणम्	730–738
वैश्वानरविद्या 747 शाण्डिल्यविद्या	748–750